

आचार्यश्रीनरेन्द्रप्रभसूरिविरचितम्

# दृष्टान्तशतम्

(सावचूरि)

आचार्यश्रीनरेन्द्रप्रभसूरिविरचितम्

# दृष्टान्तशतम्

(सावचूरि)

श्रुतभवनसंशोधनकेन्द्रम्
पुणे

**श्रुतदीपग्रन्थश्रेणिः २९**

| | | |
|---|---|---|
| **ग्रंथनाम** | - | दृष्टान्तशतम् (सावचूरि) |
| **कर्ता** | - | आ. नरेन्द्रप्रभसूरि |
| **विषय** | - | उपदेश |
| **सम्पादक** | - | मुनिवैराग्यरतिविजयगणी |
| **अनुवाद** | - | हिंदी - विनय गायकवाड,<br>गुजराती - सा.श्री मधुरहंसाश्रीजी, सा.श्री धन्यहंसाश्रीजी |
| **प्रकाशक** | - | श्रुतदीप रिसर्च फाउंडेशन- श्रुतभवन संशोधन केंद्र, पुणे |
| **पत्र** | - | १८ + ७४ = ९२ |
| **आवृत्ति** | - | प्रथम, वि.सं.२०७५, ई.२०१९ |
| **मूल्य** | - | १०० रु. |
| **स्वामित्व** | - | श्रमणसंस्थाधीनश्रुतदीपानुसन्धानसंस्थानम्। |
| ISBN | - | 978-81-941972-3-2 |

**-: प्राप्तिस्थल :-**

| | | |
|---|---|---|
| **पुणे** | : | **श्रुतभवन संशोधन केन्द्र**<br>४७/४८ अचल फार्म, आगम मंदिर से आगे,<br>सच्चाई माता मंदिर के पास, कात्रज, पुणे-४११०४६<br>Mo.7744005728 (9-00am to 5-00pm)<br>www.shrutbhavan.org  Email : shrutbhavan@gmail.com |
| **अहमदाबाद** | : | **श्री उमंगभाई शाह**<br>बी-४२४, तीर्थराज कॉम्प्लेक्स, वी. एस. हॉस्पिटल के सामने<br>मादलपुर, अहमदाबाद. मो.०९८२५१२८४८६ |
| **मुंबई** | : | **श्री गौरवभाई शाह**<br>सी/१११, जैन एपार्टमेंट, ६० फीट रोड, देवचंद नगर रोड,<br>भायंदर (वेस्ट) मुंबई-४०११०१. मो.०९८३३१३९८८३ |
| **सुरत** | : | **श्री सेवंतीलालभाई मेहता**<br>ओंकारसूरि ज्ञानमंदिर, सुभाष चौक,<br>गोपीपुरा, सुरत - ३९५००१  मो. ९८२४१५२७२७ |
| **मुद्रण** | : | **नूतन आर्ट,** अहमदावाद |

# प्रकाशकीय

पूज्य आचार्य श्री नरेन्द्रप्रभसूरि द्वारा रचित **दृष्टान्तशत अवचूरि** सहित श्रीसंघ के करकमल में समर्पित करते हुए हमें आनंद की अनुभूति हो रही है। श्रुतभवन संशोधन केंद्र के सन्निष्ठ समर्पित सहकारिगण की कडी महेनत और लगन से दुर्गम कार्य संपन्न हुआ है। इस अवसर पर श्रुतभवन संशोधन केंद्र के संशोधन प्रकल्प हेतु गुप्तदान करने वाले दाता एवं श्रुतभवन संशोधन केंद्र के साथ प्रत्यक्ष-अप्रत्यक्ष रूप से जुडे हुए सभी महानुभावों का हार्दिक अभिनंदन करते हैं। हम उन संस्था एवं विद्वानों के भी आभारी हैं जो हमें मार्गदर्शन और सहाय करते हैं।

इस ग्रंथ के प्रकाशन का अलभ्यलाभ **मातुश्री स्व. हंसाबेन विनुभाई शाह, बहन श्री स्व. सरयुबेन नयनकुमार शाह** के स्मरण में ज्ञानद्रव्य से प्राप्त किया है। आपकी अनुमोदनीय श्रुतभक्ति के लिये हम आपके आभारी हैं। अक्षरयोजन का कार्य नूतन आर्ट के धर्मेशभाई पटेल ने उत्साह से किया। एतदर्थ उनको धन्यवाद।

**डॉ. जितेंद्र शाह**

(मानद विश्वस्त)

# શ્રુતપ્રેમી

માતુશ્રી સ્વ. હંસાબેન વિનુભાઇ શાહ

બહેન સ્વ. સરયુબેન નયનકુમાર શાહ

ના સ્મરણાર્થે

# अनुक्रमणिका


| | | पत्राङ्कः |
|---|---|---|
| **सम्पादकीयम्** | | |
| **कृतिपरिचयः** | | |
| **दृष्टान्तशतं सावचूरि** | | **१** |
| **दृष्टान्तशतस्य राष्ट्रभाषासारानुवादः** | | **२९** |
| **दृष्टान्तशतस्य गुजरातीभाषासारानुवादः** | | **४१** |
| **परिशिष्टानि** | | |
| **प्रथमं परिशिष्टम्** | श्लोकानाम् अकारादिक्रमः। | **५३** |
| **द्वितीयं परिशिष्टम्** | दृष्टान्तशते प्रयुक्तानां दृष्टान्तानां सूचिः। | **५८** |
| **तृतीयं परिशिष्टम्** | साधर्म्यवैधर्म्यालङ्कारानुसारेण श्लोकाङ्कसूचिः। | **६३** |
| **चतुर्थं परिशिष्टम्** | संदर्भग्रंथसूचि। | **६४** |

# सम्पादकीयम्

## प्रस्तावना—

ग्रन्थेऽस्मिन् मलधारगच्छीयाचार्यश्रीनरेन्द्रप्रभसूरिविरचितं सावचूरिकं दृष्टान्तशतं सम्पिपादयिषितम्। दृष्टान्तालङ्कारमाध्यमेन सामान्यनीतिविषयक उपदेशोऽस्य विषयः। स चायं पूर्वमप्रकाशितत्वात् सम्यक्सम्पाद्य प्राकाश्यं नीयते। ग्रन्थस्य ग्रन्थकर्तुश्च परिचयो विस्तारेण कृतिपरिचये प्रस्तुतः तत एवावगाह्यः।

## सम्पादनसामग्री—

अस्य ग्रन्थस्य द्वे हस्तलिखिते उपलभ्येते। एकं जयपुरस्थहरिसागरभाण्डागारे वर्तते (क्र.४६) परन्तु सम्पर्काभावात् जयपुरस्थं हस्तलिखितम् अद्यावधि न प्राप्तम्। द्वितीयं पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यामन्दिरे वर्तते(क्र.१३७३/१८८७-९१ नवीनक्रमः.५)[१]। प्रस्तुतं सम्पादनं भाण्डारकरप्राच्यविद्यामन्दिरस्थस्य हस्तलिखित-स्याधारेण सम्पन्नम्।

## हस्तलिखितस्य बाह्यपरिचयः—

पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनसंस्थाने एतद्धस्तलिखितं वर्तते। अस्य क्रमाङ्कः १३७३/१८८७-९१ (नवीनक्रमः ५)। कर्गजपृष्ठे देवनागरीलिप्या लिखितम् एतद्धस्तलिखितं पूर्णं विद्यते। पञ्चपाठात्मकस्यास्य चत्वारि पत्राणि सन्ति, प्रत्येकस्मिन् पत्रे द्वाषष्टी पङ्क्तयः(६२), प्रतिपङ्क्तौ एकचत्वारिंशदक्षराणि(४१) सन्ति। अक्षराणि सुस्पष्टानि सुवाच्यानि च सन्ति। अन्तिमपृष्ठे पुष्पिकावाक्यं वर्तते किन्तु लेखनकालः, लेखकपरिचयश्च न वर्तते। पृष्ठाङ्कलेखने वैशिष्ट्यं न दृश्यते। कोणेषु त्रुटितत्वात् हस्तलिखितस्य कश्चित्पाठोऽपि भ्रष्टः। हस्तलिखितस्य मध्यभागे वामदक्षिणयोः च समासयोः[२] श्रीवत्साकारा[३] मध्यफुल्लिका वर्तते। अधस्समासे च

---

१ जिनरत्नकोशः-१(१७७)

२ हस्तलिखिते लेखनस्य संरक्षणार्थं चतुःषु भागेषु यो रिक्तो भागो दृश्यते तस्य समास इति सञ्ज्ञा। पञ्चपाठात्मके हस्तलिखिते चतुःष्वपि समासभागेषु लेखनं वर्तते।

३ जैनधर्मे प्रसिद्धेष्वष्टसु माङ्गलिकाकारेष्वन्यतम आकारः।

अर्धश्रीवत्साकारा मध्यफुल्लिका[१] वर्तते।

**हस्तलिखितस्यान्तरङ्गपरिचयः—**

हस्तलिखितस्यान्तरिकपरिचये कर्तव्ये त्रयः बिन्दवः विचारणीयाः सन्ति। लेखनशैली, चिह्नानाम् उपयोगः, संशोधनप्रकारश्च।

एतद्धस्तलिखितं जैनदेवनागरीलेखनशैल्या लिखितमस्ति।

संयुक्ताक्षराणि स्पष्टरूपेण दृश्यन्ते। पृष्ठमात्रायाः उपयोगः कृतः। श्लोकानुक्रमे वैतथ्यं वा व्युत्क्रमो नास्ति।

कुत्रचित् सङ्केताक्षराणाम् उपयोगो दृश्यते यथा किं विशिष्टम् इत्यस्य स्थाने किं वि० इत्यादि। (द्रष्टव्यम्- पत्राङ्कः- १ब, श्लोकाङ्कः २३,३२)

प्रतिलेखकानावधानाद्धस्तलिखिते पादपूरणार्थं दीयमानो दण्डो कुत्रचिद् श्लोकानां प्रथमचरणे दत्तः, अक्षरं संयोज्य वा दत्तः तस्मात् स दण्ड आकारौकारयोः भ्रममुत्पादयति। (द्रष्टव्यम्- पत्राङ्कः- १अ, श्लोकाङ्कः १)

सन्धिस्थाकारनिदर्शनायावग्रहस्योपयोगः कृतः। (द्रष्टव्यम्- पत्राङ्कः- १अ, श्लोकाङ्कः ५)

द्वित्वसन्धिः क्वचिद्दृश्यते क्वचिन्न दृश्यते। (द्रष्टव्यम्- पत्राङ्कः- १अ, श्लोकाङ्कः ३, ११)

अनवधानवशात् प्रतिलेखकोऽपेक्षितस्याक्षरस्य स्थाने तद्वदाभासमानम् अक्षरान्तरं लिलेख यथा चकारस्थाने वकारम्, नकारस्थाने तकारम्, शकारस्थाने सकारम् अलिखत्। (द्रष्टव्यम्- पत्राङ्कः- १) १अ, श्लोकाङ्कः ११। २) १ब, श्लोकाङ्कः २०। ३) २अ, श्लोकाङ्कः ३५)

लेखनदृष्ट्या हस्तप्रतिरशुद्धास्ति। (द्रष्टव्यम्- पत्राङ्कः- १अ, श्लोकाङ्कः ३)

हस्तप्रतौ ग्रन्थस्य पाठो भ्रष्टो जातः।

(द्रष्टव्यम्- पत्राङ्कः- १अ, श्लोकाङ्कः ५)

---

१ पुरातनकाले ताडपत्रीयपत्राणां सूत्रेण बन्धनार्थं रन्ध्रम् अक्रियत। कर्गजहस्तलिखितेषु तदनुकरणरूपेण स्थाप्यमानो रिक्तो मध्यभागो मध्यफुल्लिका इत्युच्यते। सा एकाधिकापि वर्तते।

पुनरावर्तमानमक्षरं कुत्रचिद् व्यसस्मरल्लेखकः। (द्रष्टव्यम्- पत्राङ्कः- ४अ, श्लोकाङ्कः १०२)

कुत्रचिल्लेखकेन श्लोकयोरवचूरिरनवधानवशात्पूर्वं लिखिता। (द्रष्टव्यम्- पत्राङ्कः- २ब, श्लोकाङ्कः४३)

स्खलितपाठस्य प्रपूरणार्थं **x** इत्येतच्चिह्नं प्रायुनक्। (द्रष्टव्यम्- पत्राङ्कः- ४अ, श्लोकाङ्कः १०६)

अक्षरसम्मार्जनार्थं तदुपरि ' इत्येतच्चिह्नं प्रायोजयत्। (द्रष्टव्यम्- पत्राङ्कः- ३अ, श्लोकाङ्कः ७७)

**सम्पादनपद्धतिः**—

अशुद्धत्वेनोपलक्षितः पाठः सम्मार्ज्य तत्रैव वृत्ताकारे ( ) कोष्ठके शुद्धपाठो दर्शितः। (द्रष्टव्यम्- श्लोकाङ्कः १,९)

स्खलितस्सङ्केतितस्त्रुटितो वा पाठः चतुरस्राकारे [ ] कोष्ठके दर्शितः। (द्रष्टव्यम्- श्लोकाङ्कः ५)

अतिरिक्तः पाठो धनुराकारे { } कोष्ठके न्यस्तः। (द्रष्टव्यम्- श्लोकाङ्कः ७६)

सम्भाविताः शुद्धपाठाः टिप्पण्यां निर्दिष्टाः। (द्रष्टव्यम्- श्लोकाङ्कः ३९)

शङ्कास्पदस्य पाठस्याग्रे प्रश्नचिह्नं कृतम्। (द्रष्टव्यम्- श्लोकाङ्कः ९४)

पठनसौकर्यार्थं मूलावचूरिपाठयोर्भेदार्थं तयोः सन्धिविच्छेदः कृतः तत्र च मूलपाठः पृथ्वक्षरैः निर्दिष्टः तस्याग्रे = इत्येतच्चिह्नं कृतम्। (द्रष्टव्यम्- श्लोकाङ्कः १)

**परिशिष्टानि**—

प्रथमे परिशिष्टे श्लोकानाम् अकारादिक्रमः वर्तते।

द्वितीये परिशिष्टे दृष्टान्तशते प्रयुक्तानां दृष्टान्तानां सूचिर्वर्तते।

तृतीये परिशिष्टे दृष्टान्तस्य साधर्म्यवैधर्म्यालङ्कारानुसारेण श्लोकाङ्क-सूचिर्वर्तते।

चतुर्थे परिशिष्टे सम्पादनेऽस्मिन् प्रयुक्तानां सन्दर्भग्रन्थानां सूचिर्वर्तते।

**कृतज्ञता—**

येषां प्रेरणया अध्ययनतपसा च श्रुतभवनस्य संशोधनकार्यं अञ्जसा प्रवर्तते ते परमपूज्याः **मुनिश्रीवैराग्यरतिविजयगणिवर्याः**, श्रुतभवनस्य प्रेरणारूपाः **साध्वीवर्याः जिनरत्नाश्रीमहोदयाः**, सम्पादनकार्यस्य मुख्यमार्गदर्शिका **डेक्कनविश्वविद्यालयस्य** भूतपूर्वा **कोशशास्त्र-संस्कृतविभागप्रमुखा डॉ. विनयाक्षीरसागरवर्याः**, वरिष्ठसम्पादकः **अमितमहोदयः**, सम्पादकः **कृष्णामहोदयः**, **अतुलमहोदयः**, **मञ्जुनाथमहोदयः**, **वर्धमानजिनरत्नकोशे कार्यरता मम सर्वे सहकारिणो**ऽस्मिन् संशोधनकार्ये साहाय्यदानेन मयि उपचक्रुरिति तान् प्रति कृतज्ञतामावहामि।

अस्य ग्रन्थस्य यथामति शुद्धसम्पादनं कर्तुं मया प्रयतितम्, तथाप्यज्ञता-वशात्सम्पादनेऽस्मिन् दृश्यमानाः क्षतयो विद्वांसः सम्मार्क्ष्यन्ति निर्देक्ष्यन्ति चेत्याशास्ते।

विनयः व्यङ्कटरावः गायकवाडः
श्रुतभवनसंशोधनकेन्द्रम्, पुणे
११.९.२०१७

## सम्पादकमण्डलम्

**मुनिश्रीवैराग्यरतिविजयगणी** (अभिवीक्षकः)

**डॉ. विनया क्षीरसागर (मार्गदर्शिका)**

**अमित उपाध्ये** (विभागप्रमुखः) **कृष्णा माळी** (सहायकः)

**अतुल मस्के** (सहायकः) **विनय गायकवाड** (सहायकः)

**मञ्जुनाथ भट्टः** (सहायकः)

**वर्धमानजिनरत्नकोशविभागः** (सहायकः)

# कृतिपरिचयः

**दृष्टान्तशतं** दृष्टान्तालङ्कारप्रधानः सुभाषितसङ्ग्रहात्मको ग्रन्थोऽस्ति। भारतीयं संस्कृतं वा प्राकृतं वाङ्मयं बहुभिः सुभाषितसङ्ग्रहात्मकैः ग्रन्थैः समृद्धं वर्तते। तत्र सुष्ठु भाषितम्, शोभनं भाषितं वा सुभाषितमित्युच्यते। अनुभवसिद्धं ह्येतदाबालगोपालाङ्गनानां यद् सुभाषितैरुक्तः सामान्योऽप्यर्थोऽधिकं ग्राह्यो भवति। श्रुतमात्रमेव सुभाषितं तथा चित्तमाह्लादयति यथा श्रोता स्वयमेव तदर्थं प्रत्युन्मुखो भवति तमर्थं सानन्दमनुचरति च। सुभाषितजन्योऽयं चित्ताह्लादजनको रसोऽमृतादप्यधिक इत्यामनन्ति। तदुक्तम्—

**द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता।**
**सुभाषितरसस्याग्रे सुधा भीता दिवं गता॥**

सुभाषितानि सामान्यजनानां बुद्धिवर्धनाय, व्यवहारज्ञानाय, उत्तमाचर-णाय कल्पन्ते। अत एव नैके ग्रन्थकर्तारः सुभाषितसङ्ग्रहात्मकान् ग्रन्थान् विरचयाञ्चक्रिरे। तेषु कानिचनात्रोदाह्रियन्ते—**भर्तृहरिकृतं**[१] **नीतिशतकम्, श्रीविद्याकरकृतः सुभाषितरत्नकोषः(ई.११००-११३०), श्रीश्रीधरकृतं सदुक्तिकर्णामृतम् (ई.१२०५), लक्ष्मीधरपुत्रश्रीजल्हणकृता सूक्तिमुक्तावली(ई.१२८५), दामोदर-पुत्रश्रीशार्ङ्गधरकृता शार्ङ्गधर-पद्धतिः(ई.१३६३)**[२] **सङ्ग्रामसिंहसोनीकृतो बुद्धिसागरः(वि.सं.१५२०), भूपेन्द्रसूरीश्वरविरचितं दृष्टान्तशतकं** चेति। तेष्वेकतमो **दृष्टान्तशता**भिधानो ग्रन्थोऽत्र प्रस्तूयते। तत्र दृष्टान्तशत इति सान्वर्था सञ्ज्ञा। दृष्टान्तशब्देनात्र दृष्टान्तालङ्कारो विवक्षितः।

प्रेक्षणार्थस्य दृश्धातोः भूतार्थे क्तप्रत्यये विहिते दृष्टशब्दो निष्पद्यते। अन्तः=निश्चयः, दृष्टोऽन्तो यस्मिन् स दृष्टान्त इत्यनया व्युत्पत्त्या दृष्टान्तशब्देनोदाहरण-मुच्यते। उदाहरणे विधेयस्य साध्यस्य प्रतिपाद्यस्यार्थस्य गृहीतस्य (Theory)

१ अनिश्चितः कालः (द्रष्टव्यम्-संस्कृतवाङ्मय का बृहद् इतिहास. भाग.४ पत्र-११०)

२ सुभाषितसङ्ग्रहात्मकग्रन्थविषयेऽधिकबोधाय द्रष्टव्यम्-(संस्कृतवाङ्मय का बृहद् इतिहास. भाग.४ पत्र-५१०-५५४)

अधुनाप्यनिश्चितस्य निश्चितिर्भवति तेन चोक्तार्थः सिद्धान्तो भवितुमर्हति प्रतिपाद्योऽर्थश्च सुग्राह्यो भवति। दृष्टान्तानां शतं दृष्टान्तशतम्। प्रकरणमन्यपदार्थं मत्वा दृष्टान्तशतं यस्मिन् तत् प्रकरणमिति सङ्ख्योत्तरपदबहुव्रीहिणा लक्षणया च दृष्टान्तशतप्रतिपादको ग्रन्थ इत्यर्थो लभ्यते।

दृष्टान्तमेव यदा काव्यमलङ्करोति तदा दृष्टान्तालङ्कारो भवति। तदुक्तम्—

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।**

सङ्ग्रहेऽस्मिन् दृष्टान्तालङ्काररूपेण सुभाषितानि प्रस्तुतानीत्यनुपदमेवोक्तम्। साहित्यशास्त्रे दृष्टान्तालङ्कार एवं विवृतः।

**दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्।**[1]

तट्टीका यथा—**एतेषाम्** साधारणधर्मादीनां **दृष्टोऽन्तः** निश्चयो यत्र स **दृष्टान्तः**। **एतेषाम्** उपमानोपमेयसाधारणधर्माणाम्। **सर्वेषाम्** इत्यनेन विकल्पपरिहारेण समुच्चयसूचनम्। **प्रतिबिम्बनम्** प्रतिबिम्बभावः (बिम्बप्रतिबिम्बभावश्च विशेषणयोर्विशेष्ययोश्च सादृश्यनिर्देशे भवति न त्वेकस्य)। **दृष्टोऽन्तो** निश्चय उपमानिर्वाहकोऽत्रेति व्युत्पत्तेः। यत्र दृष्टान्तवाक्येन दार्ष्टान्तिकवाक्यार्थनिश्चयस्य प्रामाण्यग्रहो भवति स दृष्टान्त इत्यर्थः। स चायं साधर्म्यवैधर्म्यरूपाभ्यां द्विधा[2]। यत्र विषयस्य दृढीकरणार्थं साधर्म्येण वैधर्म्येण वा वस्तुनो रमणीयमुदाहरणं दीयते स एव दृष्टान्तालङ्कारः।

**साधर्म्यदृष्टान्तालङ्कारः—**

**त्वयि दृष्ट एव तस्या निर्वाति मनोमनोभवज्वालितम्।**
**आलोके हि हिमांशोर्विकसति कुमुदं कुमुद्वत्याः॥**[3]

सख्याः नायकं प्रति वचनमिदम्। मनोभवज्वलितं कन्दर्पतप्तं तस्या नायिकाया मनस्त्वयि दृष्ट एव निर्वाति नाम प्रसन्नं भवति, दृष्टान्तमाह-हिमांशोश्चन्द्रस्यालोके-दर्शने हि कुमुद्वत्याः कुमुदम्-कुसुमं विकसतीत्यर्थः। अत्र साधर्म्यस्यापि प्रतिबिम्बतैवेति।

---

१ काव्यप्रकाश.उल्लास.१०, पत्र-६०९, श्लो. १०२।

२ सुधासागर.पत्र- ६०९

३ काव्यप्रकाश.उल्लास.१०, पत्र-६०९, श्लो.४५५

## वैधर्म्यदृष्टान्तालङ्कारः—

**तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः।**

**भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः॥**[1]

हे राजन्! आहवे सद्ग्रामे साहसकर्मशर्मणः-सहसा मारणशीलस्य अत एव करम्-पाणिं कृपाणान्तिकम्-खड्गसमीपमानिनीषतः-आनेतुमिच्छतः तव परेषाम्-शत्रूणां भटाः-योद्धारो विशरारुताम्-विशीर्णताम् अगुः-उत्कटभयादेकैके पलायमानतां प्रापुः। दृष्टान्तमाह—पांसवः-रजांसि हि निश्चयेनावाते-अनिलाभावे स्थिरतां दधतीत्यर्थः।

## विशेषता—

ग्रन्थेऽस्मिन् सर्वाणि एकविंशत्यधिकशतप्रमाणानि सुभाषितानि दृष्टान्तालङ्कारगर्भितानि सन्ति। इत्यस्य ग्रन्थस्य वैशिष्ट्यम्। तत्र साधर्म्यालङ्कारगर्भितानि दशाधिकानि शतानि सुभाषितानि, वैधर्म्यालङ्कारगर्भितानि दशसुभाषितानि सन्ति। अस्मिन् ग्रन्थेऽनुष्टुब्च्छन्दोबद्धाः दृष्टान्तालङ्कारप्रयुक्ताः श्लोकाः सन्ति। **श्रीमद्धनविजयगणिविरचितम् आभाणशतकम्, अज्ञातकर्तृकं दृष्टान्तशतं चैतत्समानविषय**मस्ति। अस्योपरि अज्ञातकर्तुः शब्दार्थव्याख्यानरूपावचूरिः वर्तते। सज्जनप्रशस्तिः, दुर्जननिन्दा, धनमाहात्म्यम्, सद्गुणाः, प्रभुः, सामान्यनीतिः इत्याद्युपदेशोऽत्र वर्णितः।

## कर्तृपरिचयः—

अस्य कर्ता मलधारगच्छीयाचार्यश्रीनरेन्द्रप्रभसूरिरस्तीति हस्तलिखितस्य पुष्पिकया ज्ञायते। मलधारगच्छस्येतिहास इत्थमुपलभ्यते। कल्पसूत्रस्थविरावल्यामेवमुक्तमस्ति यदार्यश्रीसुस्थितसूरेः कोटिकगण उत्पन्नः। तस्य चतस्रः शाखा आसन् तद्यथा—उच्चानागरी, विद्याधरी, वज्री, माध्यमिका च। तस्य चत्वारि कुलान्यासन् तद्यथा—ब्रह्मलिप्यम्, वस्त्रलिप्यम्, वाणिज्यम्, प्रश्नवाहनं च। तत्र माध्यमिकाशाखायाः प्रवर्तकः स्थविरः श्रीप्रियग्रन्थसूरिरासीत्[2]। तस्य चायं सम्बन्धः।

---

१ काव्यप्रकाश.उल्लास.१०, पत्र-६०९ श्लो.४५६

२ थेरेहिंतो णं सुट्ठिय-सुप्पडिबुद्धेहिंतो कोडियकाकंदएहिंतो वग्घावच्चसगुत्तेहिंतो इत्थ णं

कल्पसूत्रसुबोधिकायामुपवर्ण्यते— **पिअगंथे त्ति एकदा त्रिशतजिनभवन-चतुः-शतलौकिकप्रासादाष्टा-दशशतविप्रगृह-षट्त्रिंशच्छतवणिग्गेह-नवशताराम-सप्तशतवापी-द्विशतकूपसप्तशतसत्रागारविराजमाने अजमेरुनिकटवर्तिनि सुभटपालराजसम्बन्धिनि हर्षपुरे श्रीप्रियग्रन्थसूरयोऽभ्येयुः, तत्र चान्यदा द्विजैर्यागे छागो हन्तुमारेभे, तैः श्राद्धकरार्पितवासक्षेपेऽम्बिकाधिष्ठितः स छागो नभसि भूत्वा बभाण—**

**ततस्ते तथा कृतवन्त इति।**

**हनिष्यथ नु मां हुत्यै बध्नीतायात मा हत।**
**युष्मद्वन्निर्दयः स्यां चेत् तदा हन्मि क्षणेन वः॥१॥**

**यत्कृतं रक्षसां द्रङ्गे कुपितेन हनूमता।**
**तत्करोम्येव वः स्वस्थः कृपा चेन्नान्तरा भवेत्॥२॥**

**यावन्ति रोमकूपाणि पशुगात्रेषु भारत!।**
**तावद्वर्षसहस्राणि पच्यन्ते पशुघातकाः॥३॥**

---

कोडियगणे नामं गणे निग्गए, तस्स णं इमाओ चत्तारि साहाओ, चत्तारि कुलाइं च एवमाहिज्जंति। से किं तं साहाओ? साहाओ एवमाहिज्जंति, तं जहा- उच्चनागरी १ विज्जाहरी य २ वइरी य ३ मज्झिमिल्ला ४ य। कोडियगणस्स एया, हवंति चत्तारि साहाओ॥१॥ से तं साहाओ। से किं तं कुलाइं? कुलाइं एवमाहिज्जंति, तं जहा पढमित्थ बंभलिज्जं बिइयं नामेण वत्थलिज्जं तु। तइयं पुण वाणिज्जं चउत्थयं पण्हवाहणयं॥१॥ थेराणं सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंदगयाणं वग्घावच्चसगुत्ताणं इमे पंच थेरा अंतेवासी अहावच्चा अभिण्णाया हुत्था, तं जहा थेरे अज्जइंददिन्ने १ थेरे पियग्गंथे २ थेरे विज्जाहरगोवाले कासवगुत्ते णं ३ थेरे इसिदत्ते ४ थेरे अरहदत्ते ५ ॥१०॥

छाया—स्थविरेभ्यः सुस्थितसुप्रतिबुद्धेभ्यः कोटिककाकन्दिकेभ्यः व्याघ्रापत्यगोत्रेभ्योऽत्र कोटिकगणो नामको गणो निर्गतः, तस्येमाः चतस्रः शाखाः चत्वारि कुलानि च एवमाख्यायन्ते, ताः काः शाखाः? शाखाः एवमाख्यायन्ते तद्यथा—उच्चनागरी, विद्याधरी च वज्री च माध्यमिका च। कोटिकगणस्य एताः भवन्ति चतस्रः शाखाः॥१॥ ताः शाखाः। तानि कानि कुलानि? कुलानि एवमाख्यायन्ते, तद्यथा—प्रथममत्र ब्रह्मलिप्यं द्वितीयं नाम्ना वस्त्रलिप्यं तु। तृतीयं पुनः वाणिज्यं चतुर्थकं पुनः प्रश्नवाहनकम्॥१॥ स्थविरयोः सुस्थितसुप्रतिबुद्धयोः कोटिककाकन्दिकयोः व्याघ्रापत्यगोत्रयोः एते पञ्च स्थविराः अन्तेवासिनः यथापत्याः अभिज्ञाताः अभवन्, तद्यथा—स्थविरः आर्यइन्द्रदिन्नः, स्थविरः प्रियग्रन्थः, स्थविरः विद्याधरगोपालः काश्यपगोत्रः, स्थविरः ऋषिदत्तः, [ऋषिदिन्नः], स्थविरः अर्हद्दत्तः॥१०॥ (कल्पसूत्रसुबोधिका. क्षण-८, पत्र-७७८-७८०)

**यो दद्यात् काञ्चनं मेरुं कृत्स्नां चैव वसुन्धराम्।**
**एकस्य जीवितं दद्यान्न च तुल्यं युधिष्ठिर!॥४॥]**

**महतामपि दानानां कालेन क्षीयते फलम्।**
**भीताभयप्रदानस्य क्षय एव न विद्यते॥५॥**

**इत्यादि, कस्त्वं प्रकाशयात्मानं तेनोक्तं पावकोऽस्म्यहम्।**
**ममैनं वाहनं कस्माज्जिघांसथ पशुं वृथा?॥६॥**

**इहास्ति श्रीप्रियग्रन्थः सूरीन्द्रः समुपागतः।**
**तं पृच्छत शुचिं धर्मं समाचरत शुद्धितः॥७॥**

**यथा चक्री नरेन्द्राणां धानुष्काणां धनञ्जयः।**
**तथा धुरि स्थितः साधुः स एकः सत्यवादिनाम्॥८॥**[१]

स्थविरश्रीप्रियग्रन्थसूरेः समयः वीरस्य चतुर्थं(विक्रमपूर्वं द्वितीयशतकम्) शतकमिति ज्ञायते। स्थविरश्रीप्रियग्रन्थसूरिसन्तानीयाः प्रश्नवाहनकुलीना आचार्याः हर्षपुरनगरस्य[२] सङ्घेन विज्ञप्ताः तत्रागताः तत आरभ्य माध्यमिकाशाखायाः प्रश्नवाहनकुलस्य गच्छो हर्षपुरीयगच्छनाम्ना प्रासीधत्। विक्रमस्य द्वादशे शतके(११२०-११५०) अस्मिन् गच्छे आचार्यश्रीअभयदेवसूरिरभवत्। तस्य निःस्पृहत्वाद् गूर्जरेश्वरः कर्णदेवः तस्मै मलधारीति बिरुदं दत्तवान्[३]। ततः प्रभृतिरयं गच्छः मलधारगच्छ इति नाम्ना प्रसिद्धोऽभवत् तस्य च परम्परा व्युच्छिन्ना। मलधारगच्छे आचार्यश्रीअभयदेवसूरिपरम्परायामाचार्यश्रीनरचन्द्रसूरिशिष्य आचार्यश्रीनरेन्द्रप्रभसूरिः बभूव। अलङ्कारमहोदधिप्रशस्तौ आचार्यश्रीनरेन्द्रप्रभसूरिणा स्वीया गुरुपरम्परा इत्थं निदर्शिता।

---

१ (कल्पसूत्रसुबोधिका. क्षण-८, पत्र-७८०-७८१)

२ चित्रकूटस्य राज्ञा अल्टेन राज्ञी हरियदेवीनाम्ना हर्षपुरनामनगरं स्थापितम्। अधुना राजस्थानप्रदेशस्य पुष्करतीर्थस्य समीपवर्ती हांसोटग्राम एव तदासीदित्युच्यते। (जैन परंपरानो इतिहास.भाग-१, प्रकरण-३४. पत्र-४७१। भाग-२, प्रकरण-३८. पत्र-२७३।)

३ जैन परंपरानो इतिहास.भाग-२.पत्र-२७४।, जयसिंहरायेण गयखंधाओ ओसरिऊण दुक्करकारओ त्ति दिन्नं मलधारीति नामं। (विविधतीर्थकल्प.कल्प-४०)

**आचार्यश्रीनरेन्द्रप्रभसूरेः गुरुपरम्परा**[१]




अभयदेवसूरि ⟶ हेमचन्द्रसूरिः ⟶ श्रीचन्द्रसूरिः ⟶
मुनिचन्द्रसूरिः ⟶ नरचन्द्रसूरिः ⟶ नरेन्द्रप्रभसूरिः।

**नरचन्द्रसूरिः**[२]—

**आचार्यश्रीनरचन्द्रसूरिः** आचार्य**श्रीनरेन्द्रप्रभसूरेः** गुरुरासीत्। आचार्यश्रीनरचन्द्रसूरिणा मन्त्रीश्वरवस्तुपालप्रार्थनया **कथारत्नसागरो** नाम ग्रन्थो व्यरचि। तत्रैव स्वपरिचयं अदाद्[३]। गूर्जरेश्वरपुरोहितकविसोमेश्वरः कीर्तिकौमुद्यां वस्तुपालप्रशस्तिकर्तारं कवीन्द्रमेनं मुनीन्द्रं श्रीनरचन्द्रसूरिमेवं प्रशंसति।

---

१ गुरुपरम्पराज्ञानार्थं नरेन्द्रप्रभकृतालङ्कारमहोदधेः प्रस्तावनायां द्रष्टव्यम्। पत्र-७-१५।

२ आचार्यनरचन्द्रसूरेरधिकज्ञानाय द्रष्टव्यम्।(जैन परंपरानो इतिहास.भाग.२.पत्र-२८२,२८३), (अलङ्कारमहोदधि.प्रस्तावना.पत्र-१२-१५)।

३ कथारत्नसागर. श्लो ८-१०

**कवीन्द्रश्च मुनीन्द्रश्च नरचन्द्रो जयत्ययम्।**
**प्रशस्तिर्यस्य काव्येषु सङ्क्रान्ता हृदयादिव[1]॥**

नरचन्द्रसूरेः स्वर्गगमनं विक्रमात् १२८७ (सप्ताशीत्यधिक-द्वादशशततमे) वर्षे समजनीति।

**नरेन्द्रप्रभसूरिः—**

अस्य परिचयः लालचन्दभगवानदासगान्धीमहोदयेन अलङ्कारमहोदधि-प्रस्तावनायां निर्दिष्टः स एवात्र उद्ध्रियते। अलङ्कारमहोदधिविधातुरस्य स्मरणं प्राप्यतेऽन्यत्र प्राकृतभाषायां सद्गुरुपद्धतौ (गाथा १९-२१ पो.रि.५,९८) इत्थम्—

**पणमह भवभयहरणं पयकमलजयं नरिंदपहगुरुणो।**
**जाण तव-चरणरेहा न लंघिया दुट्ठसत्तेहिं॥**

विक्रमात् १३८५-१४०५ (पञ्चाशीत्यधिकत्रयोदशशततमवर्षतः पञ्चाधिकचतुर्दशशततमे) वर्षे राजशेखरसूरिर्नरेन्द्रप्रभसूरिमेतद्ग्रन्थकर्तृत्वेन संस्मरति स्म न्यायकन्दलीपञ्जिका-प्रशस्तौ (श्लो.१६, पी.रि.३,२७५)

**तस्य गुरोः प्रियशिष्यः प्रभुर्नरेन्द्रप्रभः प्रभावाढ्यः।**
**योऽलङ्कारमहोदधिमकरोत् काकुत्स्थकेलिं च॥**

इतः सप्तशत्या वर्षेभ्यः प्राक् तादृशं सन्तोषकरं काव्यरहस्यनिर्णायकं कविकलासर्वस्वज्ञापकं शास्त्रमुपलभ्यमानं नासीदतः मन्त्रीश्वरवस्तुपालस्याभ्यर्थनया तत्प्रमोदाय साहित्यतत्त्वज्ञ-कविकलाविद्-गुरुनरचन्द्रसूरिनिर्देशेन विक्रमात् १२८२ द्व्यशीत्यधिकद्वादशशततमे वर्षे **नरेन्द्रप्रभसूरिणालङ्कारमहोदधि**र्निर्ममे।[2] अनेन तस्य कालः त्रयोदशशताब्द्याः पूर्वार्धतः चतुर्दशशताब्द्या उत्तरार्धपर्यन्तोऽनुमीयते। प्राच्यैरलङ्कारकारैः प्रकाशितानां वचसां सारसङ्ग्रहरूपेयं कृतिः। स्वानि काव्यालङ्कारसूत्राणि स्वयं विवृतानि इत्यत्र स्पष्टं समसूचि[3]। विक्रमात् १२८२

---

१ कीर्तिकौमुदी. श्लो.२२।

२ अलङ्कारमहोदधि.प्रस्तावना. श्लो १७-२१।

३ कथारत्नसागरे (श्लो.८), अलङ्कारमहोदधौ च (श्लो.१६)—
अन्येद्युर्भक्तितो मौलौ निधाय करकुड्मलम्। तेन विज्ञपितः श्रीमान् नरचन्द्रो मुनीश्वरः॥
केचिद् विस्तरदुस्तरांस्तदितरे सङ्क्षेपदुर्लक्षणाः सन्त्यन्ये सकलाभिधेयविकलाः क्लेशावसेयाः परे।

द्व्यशीत्यधिकद्वादशशततमे वर्षे निष्पन्नायामस्य वृत्तेश्च प्रमाणं सार्धचतुष्टयसहस्र-श्लोकपरिमितमित्यादि महोदधिकारेणात्र स्वयं स्फुटं निरदेशि। रचनास्थानस्य निर्देशस्तु नाकारि, गूर्जरराजधान्यां पत्तनेऽथवा वीरधवलपालिते मन्त्रीश्वरवस्तुपालप्र-तिष्ठाबहुले स्थले धवलक्कके रचना सम्भावयितुं शक्यते।

अत्र मूले काव्यप्रयोजन-कारणस्वरूपभेदनिर्णय-शब्दवैचित्र्य-ध्वनिनिर्णय-गुणीभूतव्यङ्ग्यगतार्थवैचित्र्य-दोषव्यावर्णन-गुणालङ्कार-शब्दालङ्कारार्थल-ङ्कारप्रतिपादकेष्वष्टसु तरङ्गेषु क्रमशः १८, ३५, ६६, ५, २४, ३२, २५, ९९ सङ्ख्याकानि ३०४ प्रमितानि सुललितानि पाठ्यानि पद्यानि विद्यन्ते। प्रतितरङ्गं प्रान्ते चैकैकं विशिष्टमुपसंहारकं पद्ये विस्तृते वृत्तेऽन्यानि चानुष्टुप्सु। विवरणे च प्राचीनमहाकविप्रयुक्तानि रसमयानि रम्याणि ९८२ परिमितानि पद्यानि विविधका-व्यनाटकादिसाहित्यग्रन्थेभ्य उद्धृत्योदाहृतानि साहित्यकलामर्मज्ञानामाकर्षकाणि भवेयुर्येषां मूलस्थलादिज्ञापिका सूची प्राकृतगाथानां च संस्कृतच्छाया भूरिपरिश्रमेणात्रास्माभिः सङ्कलितोपयुक्ता ज्ञास्यते। एवं ग्रन्थकृद्ग्रन्थादिनामज्ञापि-कोपयुक्तानामैतिहासिकानाम्नां सूची प्रदर्शिता, विस्तरेण च विषयानुक्रमोऽपि पृथक् प्रदर्शित इति नेह विशेषेण प्रयत्यते।

'आचार्यश्रीनरेन्द्रप्रभसूरिकृतं' काकुत्स्थकेलिसञ्ज्ञकं नाटकं १५०० श्लोकपरिमितं सूचितं श्रीकान्तिविजयगणिलिखितायां प्रायः शतत्रयवर्षेभ्यः प्राचीनायां ग्रन्थसूच्यां (पुरातत्त्वे पु.२, पृ.४२६) ग्रन्थकर्तुरन्ये ग्रन्थास्तूपरि ज्ञापिताः।

**आचार्यश्रीनरेन्द्रप्रभसूरेः ग्रन्थसम्पद् -**

अलङ्कारमहोदधिः, काकुस्थकेलिः, विवेकपादपः, विवेककलिका, वस्तुपालप्रशस्तिद्वयम्, दृष्टान्तशतं च।

---

इत्थं काव्यरहस्यनिर्णयबहिर्भूतैः प्रभूतैरपि ग्रन्थैः श्रोत्रगतैः कदर्थितमिदं कामं मदीयं मनः॥
तन्मे नातिसविस्तरं कविकलासर्वस्वगर्वोद्धुरं शास्त्रं ब्रूत किमप्यनन्यसदृशं बोधाय दुर्मेधसाम्।
इत्यभ्यर्थनया प्रतीतमनसः श्रीवस्तुपालस्य ते श्रीमन्तो नरचन्द्रसूरिगुरवः साहित्यतत्वं जगुः॥
तेषां निदेशादय सद्गुरूणां श्रीवस्तुपालस्य मुदे तदेतत्। चकार लिप्यक्षरसन्निविष्टं सूरिर्नरेन्द्रप्रभनामधेयः॥
काव्यालङ्कारसूत्राणि स्वानि किञ्चिद् विवृण्महे। तन्मनस्तन्मयीकृत्य विभाव्यं कोविदोत्तमैः॥
नास्ति प्राच्यैरलङ्कारकारैराविष्कृतं न यत्। कृतिस्तु तद्वचः सारसङ्ग्रहव्यसनादियम्॥
(अलङ्कारमहोदधि-प्रारम्भे श्लो.१७-२१)

**श्रीनरेन्द्रप्रभसूरिविरचितम्**

# ॥दृष्टान्तशतम्॥

**(सावचूरि)**

[मूलम्] **प्रणिपत्य परं ज्योतिर्नानाभणितभङ्गिभिः।**
**श्लोकैरेव यथाशक्ति सूक्तमालां वितन्महे॥१॥**

[अव.] **प्रणिपत्य०** वयं **सूक्तमालाम्** = सुभाषितश्रेणिं वितन्महो(हे।) श्लोकैरेव **यथाशक्ति** = शक्तिं य(क्तिर्य)था स्यात् तथा विस्तारयामि। किं कृत्वा? **परम्** = प्रकृष्टं **ज्योतिः** = तेजः **प्रणिपत्य** = नत्वा किं वि०[शिष्टैः] **श्लोकैः नानाभणितभङ्गिभिः** = विचित्रवचनविच्छित्तिभिः॥१॥

[मूलम्] **कलाकलापसम्पन्ना जल्पन्ति समये परम्।**
**घनागमविपर्यासे केकायन्ते न केकिनः॥२॥**

[अव.] **कलाक० कलाकलापसम्पन्नाः** = कलासमूहसम्पूर्णाः पुरुषाः **समये** = अवसरे **परं जल्पन्ति**। यथा **केकिनः** = मयूराः **घनागमविपर्यासे** = वर्षाकालप्रान्ते **न केकायन्ते** = न किङ्कारवं[1] कुर्वन्ति॥२॥

[मूलम्] **उपकर्ता स्वतः कश्चिदपकर्ता च कश्चन।**
**चैत्रस्तरुषु पत्राणां कर्ता हर्ता च फाल्गुनः॥३॥**

[अव.] **उप० कश्चित्** = पुमान् **स्वत(तः)** = स्वभावतः **उपकर्ता** = उपकारको भवेत्। **कश्चन** = पुमान् स्वभावतश्च **अपकर्ता** = द्रोहकर्ता स्यात्। यथा **चैत्रः** = मासः स्वभावतः **तरुषु** = वृक्षेषु **पत्राणां कर्ता। फाल्गुनश्च तरुषु पत्राणां हर्ता** स्यात्॥३॥

[मूलम्] **कल्याणमूर्तेस्तेजांसि सम्पद्यन्ते विपद्यपि।**
**किं वर्णिका सुवर्णस्य नारोहति हुताशने॥४॥**

[अव.] **कल्याण० कल्याणमूर्तेः** = भाग्यवतः पुरुषस्य **विपद्यपि** = कष्टेऽपि **तेजांसि सम्पद्यन्ते**। यथा **सुवर्णस्य वर्णिका हुताशने** = अग्नौ **किं न**

---

१ केकारवम् इति भाव्यम्?।

**आरोहति** = किं न वर्द्धते? अपि तु आरोहत्येव॥४॥

[मूलम्] **दधत्यार्तं सुखाकर्तुं[1] सन्तः सन्तापमात्मना।**
**सुदुःसहं सहन्ते हि तरवस्तपनातपम्॥५॥**

[अव.] **दधत्या० सन्तः** = सत्पुरुषाः **आर्तम्** = पीडितं **सुखाकर्तुम्** = सुखमयं कर्तुम् **आत्मना सन्तापं** स[2][म]स्तभावेन **दधति** = धरन्ति। यथा [**तर**]**वः** = वृक्षाः **सुदुःसहम्** = अत्यर्थं स[हितु]म् अशङ्क्यं(क्यं) **तपनातपम्** = सूर्यातपं स[हन्ते]॥५॥

[मूलम्] **गुणिनः स्वगुणैरेव सेवनीयाः किमु श्रिया।**
**कथं फलर्द्धिवन्ध्योऽपि नानन्दयति चन्दनः॥६॥**

[अव.] **गुणिनः० गुणिनः** = गुणवन्तः [पु]रुषाः **स्वगुणैरेव** = आत्मगुणैः [**सेव**]**नीयाः** भवन्ति। **श्रिया** = लक्ष्म्या **कि[मु]** = किं सेवनीयाः? अपि नैव। यथा **च[न्द]नः फलर्द्धिवन्ध्योऽपि** = फल[रहि]तोऽपि, जनं **कथं न आनन्दयति** = न हर्षं प्रापयति? अपि तु प्रापयत्येव॥६॥

[मूलम्] **न ह्येके व्यसनोद्रेकेऽप्याद्रियन्ते विपर्ययम्।**
**जहाति दह्यमानोऽपि घनसारो न सौरभम्॥७॥**

[अव.] **न ह्येके० एके** = सत्पुरुषाः **व्यसनोद्रेकेऽपि** = कष्टाधिक्येऽपि **विपर्ययम्** = विपर्यासं **न हि आद्रियन्ते**। यथा **घनसारः** = कर्पूरः **दह्यमानोऽपि** = ज्वलन्नपि **सौरभम्** = सुरभिगन्धं **न जहाति** = न त्यजति॥७॥

[मूलम्] **विकारमुपकारोऽपि कुरुते समयं विना।**
**अकालोपस्थिता वृष्टिर्महारिष्टाय जायते॥८॥**

[अव.] **विकार० उपकारोऽपि समयम्** = अवसरं **विना विकारं कुरुते**। यथा **वृष्टिः अकालोपस्थिता** = अवसरं विना कृत(ता) **महारिष्टाय जायते** = स्यात्॥८॥

---

१ सुखीकर्तुम् इति भाव्यम्।

२ पत्रस्य प्रान्तभागः त्रुटितः अतः अक्षराणि न दृश्यन्ते।

[मूलम्] **निसर्गेणैव पिशुनः स्वजनोच्छेदकारकः।**
**राहुराहूयते केन विधोवै(र्वै)धुर्यहेतवे॥९॥**

[अव.] **निसर्गे० पिशुनः** = दुर्जनः **निसर्गेणैव** = स्वभावेनैव **स्वजनोच्छेद-कारकः** = कुटुम्बच्छेदकर्ता स्यात्। यथा **राहुः केन** पुंसा **विधोः** = चन्द्रस्य **वैधुर्यहेतवे** = कष्टकारणाय **आहूयते** = आकार्यते अपि तु न केनापि॥९॥

[मूलम्] **निजव्यापारनिश्चिन्ता निद्रायन्ते भुजङ्गमाः।**
**जगद्द्रोहप्ररोहाय यतो जागर्ति दुर्जनः॥१०॥**

[अव.] **निजव्या० भुजङ्गमा(माः)** = सर्पाः **निजव्यापारनिश्चिन्ताः** = आत्मकार्यरहिताः सन्तो **निद्रायन्ते** = निद्रां कुर्वन्ति। **यतः** = कारणात् **दुर्जन(नो) जगद्द्रोहप्ररोहाय** = विश्वद्रोहकरणाय **जागर्ति** = न स्वपति[१]॥१०॥

[मूलम्] **दुर्जनः कालकूटं च ज्ञातमेतौ सहोदरौ।**
**अग्रजन्मानुजन्मा वा न विद्मः कतरोऽनयोः॥११॥**

[अव.] **दुर्जनः०** मया ज्ञातं **दुर्जनः** च अन्यत् **कालकूटम् एतौ** = द्वौ **सहोदरौ** = भ्रातरौ वर्त(र्ते)ते। पुनए(रे)वं **न विद्मः** =[न जानीमः] **अनयो(योः)** = द्वयोर्मध्ये **कतरोऽग्रजन्मा** = वृद्धभ्राता को**[ऽनु]जन्मा** = लघुभ्राता॥११॥

[मूलम्] **कर्णौ भोगभृतां मूर्ध्नि साधु नाधत्त यद्विधिः।**
**सकर्णकोऽथ कुरुते मर्मवित् कर्म तादृशम्॥१२॥**

[अव.] **कर्णौ भो० विधिर्यत्** = यस्मात् कारणात् **भोगभृताम्** = सर्पाणां **मूर्ध्नि** = मस्तके **कर्णौ न आधत्त** = न अकरोत् ततो(?) साधुमनोऽन्यं[२] स सर्पः **सकर्णकः** = कर्णसहितः सन् **मर्मवित्** = मर्मज्ञः **तादृशं कर्म कुरुते**॥१२॥

---

१ अत्र स्वपिति इति रूपं भाव्यं किन्तु सूत्रेण स्वपति इति प्रयोगोऽपि सिद्ध्यति।

२ तत् साधु मन्येऽथ इति भाव्यम्। अथशब्दो नोद्धृतः।

**[मूलम्] गर्वः सर्वङ्कषोऽस्तीति गिरिं(रं) मा स्म वृथा कृथाः।**
**अद्यापि तव जैत्राणि चरित्राणि दुरात्मनाम्॥१३॥**

**[अव.] गर्वः स० गर्वः सर्वेक(र्वङ्क)षः** = सर्वविनाशकोऽस्ति इति **गिरं वृथा मा स्म कृथाः** = मा कार्षी(र्षीः) **अद्यापि दुरात्मनां चरित्राणि तव [जैत्रा]णि** जयनशीलानि वर्तन्ते॥१३॥

**[मूलम्] समर्थानां समर्थोऽरिनिग्रहाय परिग्रहः।**
**प्रभविष्णुः(ष्णु)स्तमोऽन्ताय प्रभा प्रातः प्रभापतेः॥१४॥**

**[अव.] सम० समर्थानां परिग्रहः अरिनिग्रहाय** = शत्रूच्छेदनाय **समर्थो** भवति। यथा **प्रभापतेः** = सूर्यस्य **प्रातः प्रभा तमोऽन्ताय** = अन्धकारनाशाय **प्रभविष्णुः** = समर्था भवति॥१४॥

**[मूलम्] स्वामिन्यस्तं प्रपेदाते(ने) सीदत्येव परिच्छदः।**
**भास्वत्यस्तमिते म्लानकमलाः कमलाकराः॥१५॥**

**[अव.] स्वामि० परिच्छदः** = परिकरः **स्वामिनि अस्तं प्रपेदाने** = प्रपन्ने सति **सीदत्येव**। यथा **कमलाकराः** = सरोवराणि **भास्वति** = सूर्ये **अस्तमिते** सति **म्लानकमलाः** = म्लानिप्राप्तकमलाः स्युः॥१५॥

**[मूलम्] चारुणा परिवारेण प्रभुर्लोके महीयते।**
**महीरुहेषु महितः किङ्किल्लिर्निजपल्लवैः॥१६॥**

**[अव.] चारु० प्रभुः** = स्वामी **चारुणा** मनोन्ये(ज्ञे)न **परिवारेण लोके** = लोकमध्ये **महीयते** = पूज्यते। यथा **किङ्किल्लिः** = अशोकतरुः **निजपल्लवैर्महीरुहेषु** = वृक्षेषु मध्ये **महितः** = पूजितः स्यात्॥१६॥

**[मूलम्] महिमानं महीयांसं सङ्गः सूते महात्मनाम्।**
**मन्दाकिनीमृदो वन्द्यास्त्रिवेदीवेदिनामपि॥१७॥**

**[अव.] महि० महात्मनाम्** = सत्पुरुषाणां **सङ्गः महीयांसम्** = प्रौढं **महिमानं सूते** = उत्पादयति। यथा [१अ]**मन्दाकिनीमृदः** = गङ्गामृत्ति[का]-**स्त्रिवेदीवेदिनामपि वन्द्याः** = वन्दनीयाः स्युः॥१७॥

[मूलम्] **सदा सर्वजनैर्भो[१अ]ग्यं श्लाघ्यं भवति वैभवम्।**
**सुखपेयं पयःपूरं वरं कूपात् सरोवरम्॥१८॥**

[अव.] **सदा० वैभवम्** = विभुत्वं प्रभुत्वं वा **सदा** = निरन्तरं **सर्वजनैर्भोग्यं सन् श्लाघ्यम्** = श्लाघनीयः(यं) भवति। यथा **पयःपूरं कूपात् सरोवरं वरं सुखपेयं** भवति॥१८॥

[मूलम्] **लोकम्पृणानपि गुणान् दोषः स्वल्पोऽपि दूषयेत्।**
**अपेया पश्य पीयूषगर्गरी गरबिन्दुना॥१९॥**

[अव.] **लोकम्० स्वल्पोऽपि दोषः लोकम्पृणानपि** = लोकं प्रीणयतो **गुणान् दूषयेत्। पश्य** = विलोकय। यथा **पीयूषगर्गरी गरबिन्दुना** = गरलबिन्दुनः(ना) **अपेया** स्यात्॥१९॥

[मूलम्] **प्रीणयन्नुपकुर्वाणं कुर्यात् कार्यं विशारदः।**
**पुष्पन्धि(न्ध)यो न पुष्पाणि दुनोति स्वं धिनोति च॥२०॥**

[अव.] **प्रीण० विशारदः** = पुमान् **उपकुर्वाणम्** = उपकारं कुर्वन्तं **प्रीणयन् सन् कार्यं कुर्यात्**। यथा **पुष्पन्धि(न्ध)यः** = भ्रमरः **पुष्पाणि न दुनोति** = न पीडयति च अन्यत् स्वम् आत्मानं **धिनोति** = प्रीणाति॥२०॥

[मूलम्] **क्रूरप्रभोः प्रभुत्वेन जनो जीवन् मृतायते।**
**असन्त इव सन्तोऽपि स्युर्भावास्तिमिरोदये॥२१॥**

[अव.] **क्रूर० जनः** = लोकः **क्रूरप्रभोः** = क्रूरस्वामिनः **प्रभुत्वेन जीवन्** सन् **मृतायते** = मृत इवाचरति। यथा **सन्तः** = विद्यमाना अपि **भावाः** = पदार्थाः **तिमिरोदये** = अन्धकारोदये **असन्त इव** = असन्त(त्त्व)माप्ता इव स्युः॥२१॥

[मूलम्] **तावत्तेजस्विनस्तेजो यावद्भाग्यमभङ्गुरम्।**
**क्षीणतैलः कियत्कालं प्रदीपोऽपि प्रदीप्यते॥२२॥**

[अव.] **तावत्ते० तेजस्विनः** = नरस्य **तेजस्तावत्** ज्ञेयम्। **यावत् भाग्यम् अभङ्गुरम्** = अवकुं(क्रं) भवति। **प्रदीपोऽपि क्षीणतैलः** = तैलहीनः सन् **कियत्कालं प्रदीप्यते**॥२२॥

**[मूलम्] निजमन्दिरमुछि(च्छि)न्दन् जायते कोऽपि दुस्सुतः।**
**स्वाश्रयं नाशयत्याशु हताशोऽयं हुताशनः॥२३॥**

[अव.] **निजम० कोऽपि दुस्सुतः** = दुष्टपुत्रो **निजमन्द(न्दि)रम्** = आवा(त्म) गृहम् **उच्छिन्दन् जायते** = भवति। यथा अयं **हुताशनः** = अग्निः **स्वाश्रयम्** = आत्माश्रयम् **आशु** = शीघ्रं **नाशयति**। किं वि[शिष्टः] **हुताशनः? हताशः** = हता आशा यस्य सः॥२३॥

**[मूलम्] औरसः स्नेहमाहात्म्यं किञ्चिदन्यत् प्रचक्ष्यते।**
**सम्पद्यापदि वा सिन्धुर्विधुं तद(म)नुरुध्यते॥२४॥**

[अव.] **औरसः० [औरसः]** = अग(ग्र)जातस्य पुत्रस्य **स्नेहमाहात्म्यं किञ्चित्** अपूर्वं **अन्यत्** प्रव(च)क्ष्यते यथा **सिन्धुः** = समुद्रः **सम्पदि वा आ[प]दि** = कष्टे **विधुम्** = चन्द्रं प्रति **तत्(म्) अनुरु[ध्य]ते** = सन्मुखं याति॥२४॥

**[मूलम्] उपार्जयति तत्कश्चित् यत् नैवोपार्जि पूर्वजैः।**
**फलं मधुरमाम्रस्य न पुनः कुसुमादयः॥२५॥**

[अव.] **उपा० क[श्चित्]** = सुत(तः) **तत् उपार्जयति यत् पू[र्व]जैर्नोपार्जि। यथा आम्रस्य फ[लं] मधुरं** स्यात्। **पुनः कुसुमादयो मधुराः न** स्युः॥२५॥

**[मूलम्] मानिनां स्वामिना दत्तं मुदेऽल्पमपि कल्पते।**
**वरं पौरन्दरं वारि बप्पीहः पातुमीहते॥२६॥**

[अव.] **मानि० मानिनाम्** = साहकारि[___]णां **स्वामिना दत्तम् अल्पमपि मुदे** = हर्षाय **कल्पते**। यथा **बप्पीहः** = पक्षी **वरम्** = प्रधानं **पौरन्दरम्**[1] = मेघसम्बन्धि **वारि** = जलं **पातुम् ईहते**॥२६॥

**[मूलम्] निर्लक्षणः क्षणाल्लक्ष्मीमाश्रयस्यापि लुम्पते।**
**पतत्कपोतः कुरुते शाखाशेषं हि शाखिनम्॥२७॥**

[अव.] **निर्लक्ष० निर्लक्षणः** = लक्षणहीणः(नः) पुमान् **क्षणात् आश्रयस्यापि**

---

१ इन्द्रस्य वर्षादेवत्वात् मेघत्वेनोल्लेख इत्याभाति।

**लक्ष्मीं लुम्पति।** यथा **कपोतः** = पक्षी **पतत्(न्)** सन् **शाखिनम्** = वृक्षं **शाखाशेषं कुरुते**॥२७॥

[मूलम्] **चिरात्फलिष्यतो नेतुदू(र्दू)रमुद्विजते जनः।**
**कियत्कालं फलोत्तालस्तालमर्थी निषेवते॥२८॥**

[अव.] **चिरा० जनः** = लोकः **चिरात् फलिष्यतः** = चिरकालेन फलितः **नेतुः** = स्वामिनो **दूरम्** = अत्यर्थम् **उद्विजते** = उद्वेगं प्राप्नोति। यथा **अर्थी** = याचकः **तालम्** = तालवृक्षं **कियत्कालं निषेवते** = सेवते अपि तु न निषेवते किं वि[शिष्टः] **अर्थी फलोत्तालः** = फलेषु उत्तालः शीघ्रतरः॥२८॥

[मूलम्] **कामं दूरफलः स्वामी लभते वचनीयताम्।**
**अद्यापि कविभिस्तालः सोपालम्भं निबध्यते॥२९॥**

[अव.] **कामं० स्वामी कामम्** = अत्यर्थं दूरफलः सन् **वचनीयतां लभते** = लोकापवादत्वं प्राप्नोति। **अद्यापि** = अद्य यावत् **कविभिः स्ता(ता)लः** = तालवृक्षः **सोपालम्भम्** = उपालम्भसहितं **निबध्यते** = ताड्यते॥२९॥

[मूलम्] **प्रभोः सम्भावनापैति तुच्छमेव प्रयच्छतः।**
**अगादग्रेतनी कीर्तिर्वटस्येदृग्फलोदये॥३०॥**

[अव.] **प्रभोः सं० प्रभोः** = स्वामिनः **तुच्छमेव** = स्तोकमेव **प्रयच्छतः** = ददतः सतः **सम्भावनापैति** = सङ्कल्पनां(ना?) प्राप्नोति यथा **वटस्य** = वटवृक्षस्य **ईदृग्फलोदये अग्रेतनी कीर्तिरगात्** = गता॥३०॥

[मूलम्] **प्रभवेत् परिभोगाय सर्वस्य दिवसो निजः।**
**दीपैरपि पराल्लक्षैर्न हि दीपोत्सवो भवेत्॥३१॥**

[अव.] **प्रभ० निजो दिवसः** = आत्मीयदिनः **सर्वस्य परिभोगाय** = उत्सवाय **प्रभवेत्** = समर्थः स्यात्। **पराल्लक्षैः** = लक्षसङ्ख्यै(ङ्ख्यैः) **दीपै(पैः) दीपोत्सवो न हि भवेत्**॥३१॥

[मूलम्] **सुकृतं सुकृतैर्लभ्यं यत् स्वतः परिपच्यते।**
**पक्वस्य स्वयमाम्रस्य स्वादः कोऽप्यतिरिच्यते॥३२॥**

[अव.] **सुकृतम्० यत् सुकृतम्** = पुण्यं **स्वत(तः)** = आत्मनः **परिपच्यते** = परिपाकं प्राप्नोति। किं वि०[शिष्टं] **सुकृतैर्लभ्यम्** = प्राप्यम्। यथा **आम्रस्य** = आम्रफलस्य **स्वयं पक्वस्य कोऽपि स्वादोऽतिरिच्यते** = अधिकः कथ्यते॥३२॥

[मूलम्] **सङ्गतिर्यादृशी तादृक्ख्यातिरायाति वस्तुनः।**
**रजनिर्ज्योस्त(त्स्न)या ज्योस्ती(त्स्नी) तमसा च तमस्विनी॥३३॥**

[अव.] **सङ्गतिः० वस्तुनः यादृशी सङ्गतिः** स्यात्। **तादृक्ख्यातिः** = प्रसिद्धिः **आयाति**। यथा— **रजनिर्ज्योत्स्नया** = चद्र(न्द्र)ज्योत्स्नया **ज्योत्स्न(त्स्नी)** = तेजोवती स्यात्। च अन्यत् **रजनिस्तमसा** = अन्धकारेण **तमस्विनी** = अन्धकारवती स्यात्॥३३॥

[मूलम्] **क्लिश्यते केवलं स्थूलः सुधीस्तु फलमश्नुते।**
**ममन्थ मन्दरः सिन्धुं रत्नान्यापुदि(र्दि)वौक[१ब]सः॥३४॥**

[अव.] **क्लिश्यते० स्थूलः** = मूर्खः **केवलं क्लिश्यते** = [पीड्य]ते। तु पुनः **सुधीः** = विद्वान् **फलम् अश्नुते** = प्राप्नोति। यथा **मन्दु(न्द)रः** = मेरुः **सिन्धुम्** = समुद्रं **ममन्थ** = मथितवान्। **दिवौ[१ब]कसः** = देवा **रत्नानि आपुः** = प्रापुः॥३४॥

[मूलम्] **आत्मीयमेव माहात्म्यं कुलं न क्वापि कल्पते।**
**उदन्वदन्वयश्चन्द्रः कालकूट(टः) किमन्वयः॥३५॥**

[अव.] **आत्मीय० आत्मीयमेव** = स्वकीयमेव **माहात्म्यं कल्पते, कुलं क्वापि न कल्पते**। यथा **चन्द्र उदन्वदन्वयः** = समुद्रवंशोत्पन्नः **कालकूटः** किं समुद्रस्य अन्वयो न वर्तते?॥३५॥

[मूलम्] **क्षणादसारं सारं वा वस्तु सूक्ष्मः परीक्ष्य(क्ष)ते।**
**निश्चिनोति मरुत्तूर्णं तूलोच्चयशिलोच्चयौ॥३६॥**

[अव.] **क्षणाद० सूक्ष्मः** = पुमान् **क्षणात् असारं वाऽथवा सारं वस्तु परीक्ष्य(क्ष)ते**। यथा **मरुत्** = वायुस्तूर्णं सी(शी)घ्रं **तूलोच्चयशिलोच्चयौ** = अर्कतूलसमूहपर्वतौ **निश्चिनोति** = निश्चयं करोति॥३६॥

[मूलम्] **न दौस्थ्येऽपि निजं स्थानं मौ(मो)क्तव्यमिति मे मतिः।**
**मृगलक्ष्मा पुनर्लक्ष्मीं किं नाभ्येति नभःस्थितः॥३७॥**

[अव.] **न दौस्थ्ये० मे** = मम इति **मतिः** = बुद्धिर्वर्तते। **दौस्थ्येऽपि** = दुःखागमेऽपि **निजम्** = आत्मीयं **स्थानम्** = आश्रमं न **मौ(मो)क्तव्यम्** = न मो[च्यं] यथा **मृगलक्ष्म्या(क्ष्मा)** चन्द्रः **नभःस्थित(तः)** = आकाशे स्थितः सन् **पुनर्लक्ष्मीम्** = सकलकलां **किं न अभ्येति** = किं न प्राप्नोति अपि तु प्राप्नोत्येव॥३७॥

[मूलम्] **लोकरूढिरिह प्रौढिरस्तु वस्तु यथा तथा।**
**दधि मङ्गलधौरेयं न पुनर्दुग्धमभ्यधुः॥३८॥**

[अव.] **लोकरू० लोकरूढिः** इह अस्मिन् जगति **प्रौढिर्वर्तते। वस्तु यथा तथा अस्तु यथा दधि मङ्गलं(ल)धौरेयम्** = मङ्गलमुख्यम् **अभ्यधुः** = कथयन्ति स्म **पुनर्दुग्धं** न अभ्यधुः॥३८॥

[मूलम्] **उत्कर्षं चापकर्षं च भृत्यानां प्रभुः[1] कर्तृकः[2]।**
**दिवसान् दिवसाधीशः चिनोत्यपच(चि)नोति च॥३९॥**

[अव.] **उत्कर्षम्० प्रभुः** = स्वामी **भृत्यानाम्** = सेवकानाम् **उत्कर्षम्** = वृद्धिम् **अपकर्षम्** = हानिं **कर्तृकः** = कर्ता भवति। यथा **दिवसाधीशः** = सूर्यः **दिवसान् चिनोति** = वृद्धिं नयति, च अन्यत् **अपचिनोति** = हानिं नयति॥३९॥

[मूलम्] **आत्मने तेऽपि द्रुह्यन्ति ये द्रुह्यन्ति महात्मने[3]।**
**पश्योलूकमनालोकमसूयन्तं विवश्व(स्व)तो(ते)॥४०॥**

[अव.] **आत्मन(ने)० ये** पुरुषाः **महात्मने** महापुरुषाय **द्रुह्यन्ति** = द्रोहं कुर्वन्ति **तेऽपि** = नराः **आत्मने द्रुह्यन्ति। पश्य** = विलोकय **उलूकम्** = धू(घू)कं किं वि०[शिष्टम्] **उलूकम् अनालोकम्** = विलोकनं रहितम्।

---

१ अनुष्टुपि पञ्चमः लघुर्भाव्यः।

२ उत्कर्षश्चापकर्षश्च भृत्यानां प्रभुकर्तृकः इति भाव्यम्।

३ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः(अष्टाध्यायीसत्रूपाठः-१.४.३७)। वैयाकरण-सिद्धान्त-कौमुदी. पत्र-४२८।

पुनः किं [विशिष्टम्] उलूकं **विवस्वते** = सूर्याय **असूयन्तम्** = ईर्ष्यां कुर्वन्तम्॥४०॥

[मूलम्] **सद्वृत्तैर्महतां पङ्क्तिराप्यते पितुरात्मजैः।**
**मङ्गलेषु समश्चक्रे पत्रैपा(रा)म्रस्य पिष्फ(प्प)लः॥४१॥**

[अव.] **सद्वृ० पितुः आत्मजैः** = पुत्रैः **सद्वृत्तैः** = सच्चरित्रैः सद्भिर्**महतां पङ्क्तिराप्यते।** यथा **पिष्प(प्प)लः सद्वृत्तैः पत्रैर्मङ्गलेषु** = माङ्गल्येषु **आम्रस्य समश्चक्रे** = कृतवान्॥४१॥

[मूलम्] **धुरि ये मधुरात्मानः पुरतस्तेऽपि निष्फलाः।**
**फलं दुर्भि(र्भ)क्षमिक्षूणामक्षू(क्षु)ण्णं किमु नेक्षसे॥४२॥**

[अव.] **धुरि ये० ये** नराः **धुरि** = आदौ **मधुरात्मानः** स्युः **तेऽपि** नराः **पुरतः** = अग्रे **निष्फलाः** स्युः। यथा **अ(इ)क्षूणां अक्षू(क्षु)ण्णं** परिपूर्णं **फलं दुर्भिक्षं किमु** = किं न ईक्षसे?॥४२॥

[मूलम्] **यस्य लोकोत्तरं सूत्रमापदा(दोऽ)प्यस्य सम्पदाम्(दः)।**
**शुद्धिमग्नौ निमग्नस्य पश्य कस्यापि वाससः॥४३॥**

[अव.] **यस्य लो० यस्तु(स्य)** वस्तुनः **लोकोत्तरं सूत्रं** स्यात्। **अस्य आपदोऽपि सम्पदः** स्युः क[स्या]पि **वाससः** = वस्त्रस्य **अग्नौ निमग्नस्य** शुद्धिं **पश्य** = विलोकय॥४३॥

{जङ्घालत्वम्०. जघन्यानाम् अधमानां जङ्घालत्वम् चपलत्वं निसर्गतः स्वभावत उन्मार्गेण कुमार्गेण स्यात्। यथा तिमिपोतः मत्स्यबालः प्रतिश्रोतः पथेन प्रवाहमार्गेण परं पथिको मार्गगामी स्यात्}[१]

[मूलम्] **सुकृते सर्वतः क्षीणे श्रीरपि क्षीयते क्षणात्।**
**पाथः पूरे तथा शोषे किं नन्दत्यरि(र)विन्दिनी॥४४॥**

[अव.] **सुकृते० सुकृते** = दु(पु)ण्ये **सर्वतः क्षीणे** सति **श्रीरपि** = लक्ष्मीरपि **क्षणात् क्षीयते** = क्षयं प्राप्नोति। यथा **अरविन्द(न्दि)नी** = कमलिनी **पाथः पूरे** = जलसमूहे तथा **शोषे** सति **किं नन्दति**॥४४॥

---

१ अतिरिक्तपाठोऽयं वस्तुतोऽष्टपञ्चाशत्तमश्लोकस्यावचूरिरियं प्रतिलेखकानवधानवशाद् अत्र दृश्यते।

**[मूलम्] विभवाभोगविस्फूर्तिरदृष्टैकनिबन्धना।**
**क्षोणीरुहपरिणाहे हेतुर्मूलस्य सोष्ट(?सौष्ठ)वम्॥४५॥**

**[अव.] विभवा० विभवाभोगविस्फूर्तिः** द्र[व्य]विस्तारसंस्फूर्तिर**दृष्टः एक[निबन्ध]ना** स्यात्। यथा **क्षीणो(क्षोणी)[रुहपरिणाहे]** = वृक्षविस्तारे **मूलस्य सौष्ट(ष्ठ)वम्** = सदृशत्वं[1] **हेतुः** = कारणं स्यात्॥४५॥

**[मूलम्] अहितेऽभ्युदिते कान्तिः समूलस्यापि नश्यति।**
**छायातरोरपि च्छाया फाल्गुने नु न नश्यति॥४६॥**

**[अव.] अहिते० समूलस्य** = नरस्य **अहिते** = शत्रौ **अभ्युदिते** = उदयं प्राप्ते सति **कान्तिर्नश्यति।** यथा **छायातरोः** = छायावृक्षस्य **छाया** = शोभा **फाल्गुने** = मासि तु[2] पुनर्**न नश्यति** अपि तु नश्यत्येव॥४६॥

**[मूलम्] स्थानोपज्ञं विदुः स्थाने महिमानं मनीषिणः।**
**देवशीर्षेषु शेषेषु माल्यं निर्माल्यमन्यथा॥४७॥**

**[अव.] स्थानोप० मनीषिणी(णः)** = विद्वांसः **स्थानोपज्ञं** = स्थानोत्पन्नं **महिमानं स्थाने** युक्तं **विदुः**। यथा **माल्यं देवशीर्षेषु** शेषा इति कथ्यते **अन्यथा निर्माल्यम्**॥४७॥

**[मूलम्] व्यवसाय(यः) प्रयासाय स्वयमस्थाननिर्मितः।**
**बीजस्यापि प्रणाशाय प्रारब्धा कृषिरूषि(ष)रे॥४८॥**

**[अव.] व्यव० अस्थाननिर्मित(तः)** = कुस्थानप्रारम्भितः[3] **व्यवसाय(यः) प्रयासाय** स्यात्। यथा **कृषिरूषरे** = ऊषरस्थाने **प्रारब्धा** सती **बीजस्यापि प्रणाशाय** स्यात्॥४८॥

**[मूलम्] तेजस्विनः प्रभोः शत्रुमुच्छिनत्ति परिच्छदः।**
**वैकर्तनात्तमो वार्तां निशुम्भन्ति गभस्तयः॥४९॥**

---

१ सुदृढत्वमिति भाव्यम्।

२ नु इति मूलपाठे सत्यपि अवचूरिकर्तृभिः तु इति मत्वार्थः कृतः।

३ प्रारब्धः इति भाव्यम्?।

[अव.] **तेज० तेजस्विनः प्रभोः परिच्छदः शत्रुम्** = वैरिणम् उच्छिनत्ति। यथा **वैकर्तनात्** = सूर्यात् **गभस्तयः** = किरणाः **तमो वार्तां निशुम्भन्ति** = छिन्दन्ति॥४९॥

[मूलम्] **लक्ष्मीभवानि तेजांसि जीयन्ते राजतेजसा।**
**कामं धम्मिल्लपुष्पेभ्यः शिखापुष्पं विशिष्यते॥५०॥**

[अव.] **लक्ष्मी० लक्ष्मीभवानि तेजांसि राजतेजसा जीयन्ते।** {शिष्या} **शिखापुष्पं कामम्** = निश्चितं **धम्मिल्लपुष्पेभ्यः विशे(शि)ष्यते** = अधिकः(कं) क्रियते॥५०॥

[मूलम्] **साक्षिणी स्यात् पितुः शिष्या(क्षा) विनीततनयं प्रति।**
**जात्येऽपि भासुरे रत्ने यत्नो वैकटिकस्य कः॥५१॥**

[अव.] **साक्षिणी० पितुः शिष्या(क्षा) विनय(नीत)तनयं प्रति** = विनीतपुत्रं प्रति **साक्षिणी** = साक्षिकारिणी स्यात्। यथा **जात्ये भासुरे** = देदीप्यमाने **रत्ने वैकटिकस्य** = उत्तेजनस्य **को यत्नः** = क उपक्रमः॥५१॥

[मूलम्] **दुर्भेदमपि भिन्दन्ति हृदयङ्गमसङ्गमाः।**
**इन्दोः स्पर्शे श्रवन्त्यम्भोबिन्दूनिन्दूपला अपि॥५२॥**

[अव.] **दुर्भेद० हृदयङ्गमसङ्गमाः** = हृदयाह्लादकसंयोगाः **दुर्भेदमपि भिन्दन्ति।** यथा **इन्दूपलाः** = चन्द्रकान्तमणयः **इन्दोः** = चन्द्रस्य **स्पर्शे** सति अम्भोबिन्दून् = जलबिन्दून् श्रवन्ति॥५२॥

[मूलम्] **परेषां दुरितं हन्तुं झम्पासम्पातमप्यहो।**
**अग्नौ करोति कोऽप्यत्र सिन्दुवारो निदर्शनम्॥५३॥**

[अव.] **परेषाम्० अहो** इति आश्चर्ये **कोऽपि** = पुमान् **परेषाम्** = अन्येषां **दुरितम्** = कष्टं **हन्तु(न्तुम्) अग्नौ झम्पासम्पातं करोति अत्र सिन्दुवारः** = गुग्गुल[1] एव **निदर्शनं** दृष्टान्तः॥५३॥

---

१ निर्गुण्डी सिन्दुवारे इत्यभिधानचिन्तामणौ (११४७)।

**[मूलम्] न ज्ञाते[1]यमुपादेयं गुणैः सम्पद्यते पदम्।**
**रवेर्व्यापारमादत्ते प्रदीपो न पुनः शनिः॥५४॥**

[अव.] **न ज्ञायते(ज्ञातेय)०** ज्ञायन्ते**(ज्ञातेयम्)** = ज्ञातिसम्बन्धि **न उपादेयम्** = न ग्राह्यम्, **गुणैः पदं सम्पद्यते**। यथा **प्रदीपो रवेः** = सूर्यस्य व्यापारम् **आदत्ते** = गृह्णाति **पुनः शनिः** = शनैश्चरो **रवेव्या(र्व्या)पारं** नादत्ते॥५४॥

**[मूलम्] सर्वेषां(षा)मप्यु(प्य)पास्यो यः सोऽपि कैश्चिदुपास्यते।**
**प्रसह्य मृज्यतेऽन्यत्र नेत्रयोः पूज्यमञ्जनम्॥५५॥**

[अव.] **सर्वेषा(षाम्)० यः** कोऽपि **सर्वेषाम् अपि उ(अ)पास्यः**= त्याज्यो भवति **सोऽपि कैश्चित् उपास्यते**। यथा **अञ्जनं प्रसह्य** = बलात्कारेण **मृज्यते** = पृथु(थ)क् क्रियते **अन्यत्र** वस्त्रादौ तद**ञ्जनं नेत्रयोः पूज्यं** स्यात्॥५५॥

**[मूलम्] स्त्रीणां दोहदमन्वेति प्रसूतिरिति गीर्मृषा।**
**केतक्याः प्रसवः सोऽयमलमालप्य दोहदम्॥५६॥**

[अव.] **स्त्रीणाम्० प्रसूतिः** = सन्तानं **स्त्रीणां दोहदम्** = दोहदसदृशम् **अन्वेति** = अनुसरति इति। **गीः** = वाणा(णी) **मृषा** = वृथा यथा **केतक्याः प्रसवः स अ(सोऽ)यं** दोहद(दम्) **आलप्य**[2] = प्राप्य **अलम्** = पूर्यताम्॥५६॥

**[मूलम्] अभ्यागारिकमभ्येति नात्मम्भरिमयं जनः।**
**विहाय वाडवं लोके अम्बोधिं(म्भोधिः) केन गम्यते॥५७॥**

[अव.] **अभ्यागा० अयं** जन **आत्मम्भरिम्** = स्वोदरपूरकं कृपणं वा **अभ्यागारिकम्** = ऋद्धिमद्गृहस्थं **न अभ्येति** = न सन्मुखं याति। **लोके केन** पुरुषेण **वाडवम्** = वडवानलं **विहाय** = त्यक्त्वा **अम्भोधिम्(धिः)** = समुद्रं(द्रो) **गम्यते न केनापि** अपि तु[3]॥५७॥

---

१ जाते इति भाव्यम्।

२ आ+लप्—धातुः प्राप्त्यर्थे न दृष्टः।

३ तात्पर्यं नावगम्यते।

[मूलम्] **जङ्घालत्वं जघन्यानामुन्मार्गेण निसर्गतः।**
**तिमिपोतः प्रतिश्रोतः पथेन पथिकः परम्॥५८॥**

[अव.] **जङ्घालत्वम्०. जघन्यानाम्** = अधमानां **जङ्घालत्वम्** = चपलत्वं **निसर्गतः** = स्वभावत **उन्मार्गेण** = कुमार्गेण स्यात्। यथा **तिमिपोतः** = मत्स्यबालः **प्रतिश्रोतः पथेन** = अप्रवाहमार्गेण **परं पथिको** = मार्गगामी स्यात्॥५८॥

[मूलम्] **गुण(णः) प्रत्युतदोषाय ध्रुवं स्यादप्यलौकिकः।**
**गगनं शून्यमित्याहुस्ततोऽत्रातिमहत्त्वतः॥५९॥**

[अव.] **गुणः प्र० अलौकिको गुणः** = लौ(लो)कमध्यरहितो गुणः **ध्रुवम्** = निश्चितं **[प्रत्युतदो]षाय** स्यात्। यथा **गगन[म्]** = [आ]काशम् **अतिमहत्त्वतः** = अतिविस्ता[र]तोऽ**त्र** = लोके **शून्यम् इति आहुः**॥५९॥

[मूलम्] **भवेद्भङ्गुरवृत्तस्य न प्रभुत्वमुदित्वरम्।**
**उवाह ग्रहसाम्राज्यं तपनो न पुनः शशी॥६०॥**

[अव.] **भवेद्भङ्० भङ्गुरवृत्तस्य** = वक्रचरित्रस्य **प्रभुत्वम् उदित्वरम्** = उदयवत् न भवेत्। यथा **तपनः** = सूर्यः **ग्रहसाम्राज्यम् उवाह** = वहति स्म **पुनः शशी** = चन्द्रो **न उवाह**॥६०॥

[मूलम्] **सभासन्निभमात्मानं दर्शयन्ति विशारदाः।**
**युक्तः क्रूरग्रहैः क्रूरः सौम्यः सौम्यैः पुनर्बुधः॥६१॥**

[अव.] **सभासं० विशारदाः** = विचक्षणाः पुरुषा **आत्मानं सभासन्निभम्** = सभादृशं दर्शयन्ति। यथा **सौम्यः** = गृ(ग्र)हः **क्रूरग्रहैर्युक्तः क्रूरः** स्यात् पुनः **बुधः सौम्यैर्युक्तः सौम्यः** स्यात्॥६१॥

[मूलम्] **विशीर्यन्ते कदर्यस्य श्रियः पातालपक्त्रिमाः।**
**अगाधमन्धकूपस्य पश्य सैवलितं पयः॥६२॥**

[अव.] **विशी० कदर्यस्य** = नीचनरस्य **श्रियः पातालपक्त्रिमाः** = पातालस्थिता **विशीर्यन्ते** = शटन्ति। यथा **अन्धकूपस्य पयः** = जलम्

**अगाधं** सत् **सैवलितम्** = प्र(सै)वालसंयुक्तं **पश्य** = विलोकय॥६२॥

[मूलम्] **मितम्पचः प्रपञ्चेन केनचित् कार्यते व्ययम्।**
**पादावर्तविवर्तेन कूपादाकृष्यते पयः॥६३॥**

[अव.] **मितम्प० केनचित्** = पुंसा **मितम्पचः** = कृपणः **प्रपञ्चेन व्ययं कार्यते।** यथा **पादावर्तविवर्तेन** = पदारघट्टभ्रमणेन **पयः कूपान्(त्) आकृष्यते** = बहिर्निष्काश्यते॥६३॥

[मूलम्] **याचते सङ्कुचद्वृद्धिर्ददाति पुनरुद्धतः।**
**लीनोऽम्बुदः पिबत्यम्बु दत्ते गर्जिभिरूर्जितः॥६४॥**

[अव.] **याचते० सङ्कुचद्वृद्धिः** = दरिद्री पुमान् **याचते पुनः इतार्ल(उद्धतः** = ल)क्ष्मीवान् **ददाति।** यथाम्**बुदः** = मेघः **लीनः** = लयं प्राप्तः सन् **अम्बु** पिबति। स एवाम्**बुद ऊर्जितः** = जलयुक्तो **गर्जिभिरम्बु दत्ते**॥६४॥

[मूलम्] **गुणान् गुणवतां वेत्तुं विरला प्रभविष्णवः।**
**वेत्ति रत्नपरीक्षाया लवमेकं न वल्लभः॥६५॥**

[अव.] **गुणान्० विरला(लाः)** = नरा **गुणवतः(तां) गुणान् वेतुं(त्तुं) प्रभविष्णवः** = समर्था भवन्ति यथा **वल्लवः(भः)** = आभीरः **रत्नपरीक्षायाम्(या) एकं लवं न वेत्ति**॥६५॥

[मूलम्] **अस्तिमानं च कः स्तौति वदान्योऽन्नै(नै)व चेन्नरः।**
**रम्यापि केन रम्येत युवतिर्यदि दुर्भगा॥६६॥**

[अव.] **अस्ति० अस्तिमान्(नम्)** = लक्ष्मीवन्तः(न्तं) पुमासं **कः स्तौति**? चेत् यदि **नरः वदान्यः** = दाता न स्यात्। यथा **युवतिः** = स्त्री **रम्यापि केन रम्येत।** अपि तु न केनापि **यदि दुर्भगा** स्यात्॥६६॥

[मूलम्] **अलङ्कारोऽप्यलङ्कर्तुमलं स्थाने नियोजितः।**
**श्रियं तारस्रजः कण्ठे दधते न तु पादयोः॥६७॥**

[अव.] **अलङ्का० अलङ्कारोऽपि स्थाने नियोजिता(तः)** = निवेशितः

सन् **अलङ्कर्तुम्** = अलङ्करणाय **अलम्** = समर्थो[१] भवति। यथा **तारस्रजः** = रूप्यमाला(लाः) **कण्ठे** निहिता(ताः) **श्रियम्** = शोभां **दधते**। **तु** पुनः **पादयोः** = चरणयोर्निहिता न शोभां धत्ते॥६७॥

[मूलम्] **अर्थिनः खलु सेवन्ते सुलभश्रीकमीश्वर(रम्)।**
**पश्य श्रोतस्विनीश्रोतः सर्वतो रुध्यतेऽध्वगैः॥६८॥**

[अव.] **अर्थिनः० खलु** = निश्चितम् **अर्थिनः** = पुरुषाः **सुलभश्रीकम्** = सुप्राप्य लक्ष्मी[वन्तम्] **ईश्वरम्** = स्वामिनं सेवन्ते। **पश्य** = विलोकय **श्रोतस्विनीश्रोतः** = नदीप्रवाहः **सर्वतोऽध्वगैः** = पथिकैः **रुध्यते**॥६८॥

[मूलम्] **अवाप्यते धनं धन्यैय(र्य)शोभिः सुरभीकृतम्।**
**किं तव श्रवणोत्सङ्गमारुरोह न रोहणः॥६९॥**

[अव.] **अवाप्य० धन्यैः** = नरैः **धनम् अवाप्यते** = प्राप्यते। किं वि०[शिष्टम्] **धनं यशोभिः सुरभीकृतम्**। यथा **रोहणः तव श्रवणोत्सङ्गं किं न** आर(रु)रोह॥६९॥

[मूलम्] **तावदर्थ(र्थः) क्रियाकारी यावद् द्रव्यमभङ्गुरम्।**
**स्वर्णकुम्भस्तु भग्नोऽपि जीवयत्यनुजीविनः॥७०॥**

[अव.] **तावदर्थः० अर्थः तावत् क्रियाकारी** = कार्यकर्ता स्यात् **यावत् अभङ्गुरं** सम्पूर्णं **द्रव्यम्** = धनं स्यात्। तु पुनः यथा **स्वर्णकुम्भः** = स्वर्णघटः **भग्नोऽपि अनुजीविनः** = सेवकान् जीवयति॥७०॥

[मूलम्] **कालोऽपि कलुखः(षः) स स्यात् सन्तो यत्रापुरापदम्।**
**रवेरस्तमयो यत्र स प्रदोषः प्रकीर्तितः॥७१॥**

[अव.] **कालोऽपि० यत्र सन्तोऽपि** = सज्जना **आपदम्** = कष्टम् **आपुः** = प्रापुः। **स क(का)लोऽपि** कलुषा(षः) स्यात्। यथा **यत्र रवेः** = सूर्यस्य **अस्तमयः स प्रदोषः** सन्ध्यासमयः **प्रकीर्तितः**॥७१॥

---

१ अलमिति पर्याप्त्यर्थग्रहणम् (वार्तिकम्. १४६२) तेन दैत्येभ्यो हरिरलम्, प्रभुः, समर्थः, शक्त इत्यादि। (वैयाकरण-सिद्धान्त-कौमुदी.पत्र- ४३२)

[मूलम्] **परोपक्रमवस्तूनामत्युच्चं पदमापदे।**
**वातेनोन्नतिमानीतः पांशुपूर(रः) पतत्यधः॥७२॥**

[अव.] **परोप० परोपक्रमवस्तूनाम्** = परेषाम् उपक्रमेण **वस्तूनाम् अति उच्चं पदम् आपदेऽपि** = कष्टाय स्यात्। यथा **पांशुपूरः** = रजःसमूह(हः) **वातेन** = वायुना **उन्नतिम्** = उच्चैस्तरत्वम् **आनीतः** = प्रापितः सन् **अधः पतति**॥७२॥

[मूलम्] **भवेत् प्रभुत्वं पुण्येन न हिरण्येन जातुचित्।**
**अद्रिराजस्तुषाराद्रिन(र्न) पुनः कनकाचलः॥७३॥**

[अव.] **भवेत्० पुण्येन प्रभुत्वं भवेत् जातुचित्** = कदाचिदपि **हिरण्येन** = सुवर्णेन **प्रभुत्वं न** हि स्यात् यथा **तुषाराद्रिः** = हिमाचलो**ऽद्रिराजः** कथ्यते पुनः **कनकाचलः** = मेरुरद्रिराजः **न** कथ्यते॥७३॥

[मूलम्] **अविमृश्याप्यतित्यागो देशत्यागाय जायते।**
**तथा दृष्टं घनैर्नष्टं वियतोऽपि यथा पुरः॥७४॥**

[अव.] **अविमृ० अविमृश्य** = अविचार्य **अतित्यागः देशत्यागाय जायते** भवति। **तथा दृष्टं घनैः** = मेघैः **वियतः** = आकाशात् **पुरो नष्टम्**॥७४॥

[मूलम्] **श्रीमन्तमुपतिष्ट(ष्ठ)न्ते नैव निर्धनमर्थिनः।**
**वानस्पत्यान् परित्यज्य भजन्ते केऽवकेशिन(नम्)॥७५॥**

[अव.] **श्रीमन्तम्० अर्थिनः** = याचकाः **श्रीमन्तम्** = लक्ष्मीवन्तम् **उपतिष्ट(ष्ठ)न्ते** = आश्रयन्ते **निर्धनं नैव**। यथा **के** पुरुषाः **वानस्पत्यान्** = सफलवृक्षान् **परित्यज्य अवकेशिनम्** = निष्फलं **भजन्ते** = आश्रयन्ते [अ] पितु नैव॥७५॥

{आत्मानु० कश्च मूर्खोऽपि आत्मानुपदिकम् आत्मसेवकं कौलं सुकुलीनं कुर्यात्। यथा भ्रामकोपलः चम्बकदृषदो लोहानि आत्मानम् अनु पृष्ठौ भ्रामयेत्॥७६॥}[1]

---

१ एषा अवचूरिर्नवतितमश्लोकस्य वर्तते।

[मूलम्] **तनुजो मा स्म भूद्यत्र जाते स्यान्मातुरातुरम्।**
**क दल्याः किमभूत्पश्य फलोत्पत्तेरनन्तरम्॥७६॥**

[अव.] **तनुजो० स तनुजः** = पुत्रो मा स्म भूत्। **यत्र तनुजे जाते** सति **मातुः आतुरम्** = कष्टं स्यात्। **पश्य** = विलोकय यथा **कदल्याः फलोत्पत्तेः अनन्तरं किम् अभू[त्]**॥७६॥

[मूलम्] **परो लक्षेष्वपत्येषु ख्यातिरेकस्य कस्यचित्।**
**सुबहुष्वम्बुजातेषु शब्दः शङ्खस्य केवलम्॥७७॥**

[अव.] **परोल० परो(?) लक्षेषु** = लक्षसङ्ख्येषु **अपत्येषु** = पुत्रेषु स[त्सु] **एकस्य कस्यचित् ख्याति**र्भवति। यथा **सुबु(ब)हुषु अम्बुजातेषु** = जलोत्पन्नेषु **केवलं शङ्खस्य शब्दः** स्यात्॥७७॥

[मूलम्] **कार्यक्षमः परोव्या(ऽप्या)प्तः कृतं पुत्रेण पङ्गुना।**
**विभावसुव(र्व)सुन्यास्तं(सं) रवेराप्नोति नो शनिः॥७८॥**

[अव.] **कार्यक्ष० कार्यक्षमः परोऽपि** = अन्योऽपि **आ[प्तः]** स्यात् = आ(अ)भीष्टो भवति **पु(प)ङ्गुना पुत्रेण कृतं** पूर्यताम्। यथा **विभावसुः** = वैश्वानरः सूर्यस्य **वसु[न्या]सम्** = तेजोन्यासम् **आप्नोति** = प्रा[प्नोति] **नो शनिः** = शनैश्चरः॥७८॥

[मूलम्] **दत्ते विपत्तिमासक्तिः प्रभोरत्युग्रतेजसः।**
**ग्रहमस्तमितं प्राहुर्गतं मार्तण्डमण्डले॥७९॥**

[अव.] **[दत्ते वि० ] अत्युग्रतेजसः प्रभोः** = स्वामिनः **आश(स)क्तिः विपत्तिम्** = कष्टं **दत्ते**। यथा **मार्तण्डमण्डले** = सूर्यमण्डले **गतम्** = प्राप्तं **ग्रहम् अस्तमितं प्राहुः**॥७९॥

[मूलम्] **धनीयन्ति धनं पत्यौ न कुलीनाः खलु स्त्रियः।**
**श्र(स्र)वन्त्यो वारिसर्वस्वमर्पयन्ति पयोनिधेः॥८०॥**

[अव.] **धनीयं० खलु** = निश्चितं **कुलीनाः स्त्रियः पत्यौ** = भर्तरि **धनं न धनीयन्ति**? अपि तु प्रापयत्ये(न्त्ये)व। यथा **स्रवन्त्यः** = नद्यः **वारिसर्वस्वम्** = जलरूपसर्वद्रव्यं **पयोनिधेः** = समुद्रस्य अर्पयन्ति॥८०॥

[मूलम्] **दुर्जातमात्मना जातं पालयन्ति समुन्नताः।**
**न(नु) वहन्ति पयोवाहाः किं नैवाशनिमीदृशम्॥८१॥**

[अव.] **दुर्जात० समुन्नताः** = सम्यगुन्नताः पुरुषाः **आत्मना जातं दुर्जातमपि** = दुष्टमपि पालयन्ति। यथा **पयोवाहा(हाः)** = मेघा **ईदृशम् अशनिम्** = विद्य(द्यु)त् **किं न(नु) नैव वहन्ति** अपि तु वहन्त्येव॥८१॥

[मूलम्] **यतन्ते समये सन्तः कृतार्थीकर्तुमर्थिनः।**
**वार्षुकाः किं नु वर्षन्ति न वर्षासु पयोमुचः॥८२॥**

[अव.] **यतन्ते० सन्तः** = सज्जना **अर्थिनः** = याचकान् **कृतार्थीकर्तुं समये यतन्ते** = यत्नं कुर्वन्ति। यथा **वार्षुकाः** = वर्षासम्बन्धिनः **पयोमुचः** = मेघाः **वर्षासु किं न(नु) न वर्षन्ति** अपि तु **वर्षन्त्येव**॥८२॥

[मूलम्] **तिरस्कारेऽपि रज्यन्ति द्विगुणं रागनिर्भराः।**
**रङ्गः पादोपमर्देन किं कुसुम्भस्य नैधते॥८३॥**

[अव.] **तिरस्का० रागनिर्भराः** = पुरुषाः **तिरस्कारेऽपि द्विगुणं रज्यन्ते**। यथा **कुसुम्भस्य रङ्गः पादोपमर्देन** = पादप्रहारेण **किं न एधते** अपि तु वर्धत्ये(त एव)॥८३॥

[मूलम्] **सर्वंसहानां वर्धिष्णुरुपकारोऽपकारिषु।**
**अनन्तं दावदातृभ्यः फलन्ति क्षेत्रभूमयः॥८४॥**

[अव.] **सर्वंस० सर्वंसहानाम् उपकारोऽपकारिषु** = द्रोहकारिषु **वर्धिष्णुः** = वर्धनशीलो भवति। **यथा क्षेत्रभूमयः दावदातृभ्यः अनन्तं फलन्ति**॥८४॥

[मूलम्] **अहो कस्यापि शब्दोऽपि कुटिलानां भयङ्करः।**
**ध्वनिभिः शिखिनां नागाः पलायन्ते दिशोदिशम्॥८५॥[३अ]**

[अव.] **अहो क० अहो** इति आश्चर्ये **कस्या[३अ]पि शब्दः कुटिलानाम्** = वक्रगतीनां **भयङ्करः** स्यात्। यथा **नागाः** = सर्पाः **शिखिनाम्** = मयूराणां **ध्वनिभिः** = शब्दैः दिशोदिशं **पलायन्ते** = नश्यन्ते(न्ति)॥८५॥

[मूलम्] **दुःसङ्गेनापि नापैति सतां स्वाभाविको गुणः।**
**विषेण सह वास्तव्यो जीवातुः फणिना(नो) मणिः॥८६॥**

[अव.] **दुःसङ्गे० सताम्** = सत्पुरुषाणां **स्वाभाविको गुणः दुःसङ्गेनापि** = कुसंसर्गेणापि **न अपैति** = न याति। यथा **फणिनः** = सर्पस्य **मणिः विषेण सह वास्तव्योऽपि जीवातुः** = जीवनकर्ता स्यात्॥८६॥

[मूलम्] **नोन्मूलयति मालिन्यं सद्गुणोऽप्यात्मजः पितुः।**
**पङ्केरुहेण पङ्कस्य कालिमा किं विलुप्यते॥८७॥**

[अव.] **नोन्मूल० सगु(द्गु)णोऽपि आत्मजः** = पुत्रः **पितुर्मालिन्यम्** = मलिनत्वं **न उन्मूलयति**। यथा **पङ्केरुहेण** = कमलेन **पङ्कस्य कालिमा किं विलुप्यते**? अपि तु न॥८७॥

[मूलम्] **सूर्याचन्द्रमसौ केन राहुराहूयते भृशम्।**
**प्रभुभ्यामपि नैताभ्यां क्षेत्रमस्मै यदर्पितम्॥८८॥**

[अव.] **सूर्याचं० केन** = नरेण **सूर्याचन्द्रमसौ**[1] **भृशम्** = अत्यर्थं **राहुः आहूयते** = आकार्यते, अपि तु न केनापि। यथा **उभा(एता)भ्याम्** = द्वाभ्यां **प्रभुभ्याम् अस्मै** = राहवे **यत् क्षेत्रं न अर्पितम्** = न दत्तम्॥८८॥

[मूलम्] **एकतानं मनः पापे नीचानामचिराद्भवेत्।**
**ध्यानं कार्ये बकोटस्य याति जन्तुजिघांसया॥८९॥**

[अव.] **एकतानम्० नीचानाम्** = जीवानां **मनः** = चित्तं **पापे** = पापकर्मणि **एकतानम्** = एकान्तम् **अचिरात्** = शीघ्रं भवेत्। यथा **बकोटस्य** = बकपक्षिणो **ध्यानं जन्तुजिघांसया** = जीवहिंसया कार्ये याति॥८९॥

[मूलम्] **आत्मानुपदिकं कौलं कुर्यान्मूर्खोऽपि कश्चिन।**
**आत्मानमतु(नु) लोहानि भ्रामयेद् भ्रामकोपलः॥९०॥**

[अव.] **आत्मानु० कश्चि(श्च)न मूर्खोऽपि आत्मानुपदिकम्** = आत्मसेवकं **कौलम्** = सुकुलीनं **कुर्यात्**। यथा **भ्रामकोपलः** = च(चु)म्बकदृषद् **लोहानि आत्मानमनु** = पृष्टौ(ष्ठौ) भ्रामयेत्॥९०॥

---

१ अर्थो नावगम्यते।

[मूलम्] **मूर्खस्य मुखमीक्षन्ते क्वापि कार्ये विचक्षणाः।**
**विना निकषपाषाणं को वेत्ति स्वर्णवर्णिकाम्॥९१॥**

[अव.] **मूर्खस्य० विचक्षणाः** = पुरुषाः **क्वापि कार्ये मूर्खस्य मुखम् ईक्षन्ते** = विलोकयन्ति। यथा **कः** = पुमान् **निकषपाषाणम्** = कषपट्टकं **विना स्वर्णवर्णिकां वेत्ति** = जानाति अपि तु न कोऽपि॥९१॥

[मूलम्] **धैर्यप्रौढिर्दृढस्यापि विपद्याशु विपद्यते।**
**अयःपिण्डोऽपि चन्द्रा(ण्डा)ग्निनिमग्नो द्रवति ध्रुवम्॥९२॥**

[अव.] **धैर्य० दृढस्यापि** नरस्य **धैर्यप्रौढिः विपदि** = कष्टे **आशु** = शीघ्रं **विपद्यते** = विलयं याति। यथा **अयःपिण्डः** = लोहगोलकः **चण्डाग्निनिमग्नः** = प्रचण्डाग्नौ ब्रुडितः[1] सन् **ध्रुवम्** = निश्चितं द्रवति॥९२॥

[मूलम्] **स्नात्वा स्थूलस्तपस्तीर्थे क्रोधपङ्के निमज्जति।**
**मङ्क्त्वाम्भसि गजो गात्रमुद्धूलयति धूलिभिः॥९३॥**

[अव.] **स्नात्वा स्थू० स्थूलः** = स्थूलशरीरः **तपस्तीर्थे [स्नात्वा क्रो]-धपङ्के** = क्रोधरूपकर्दमे **[नि]मज्जति**। यथा **गजः** = हस्ती **[अम्भ]-सि** = जले **मङ्क्त्वा** = स्नानं कृत्वा **गा[त्रम्]** = शरीरं **धूलिभिः** = रजोभि**रुद्धूल[य]ति** धूलियुक्तं करोति॥९३॥

[मूलम्] **विभवे विभवभ्रंसे सैव मुद्रा महात्मनाम्।**
**अब्धौ सुरात्तसारेऽपि न मर्यादाविपर्ययः॥९४॥**

[अव.] **विभवे० महात्मनाम्** = नराणां **विभवे** = प्र[भु]त्वे द्रव्ये वा **विभवभ्रंसे** = द्रव्यस्थाना(?) **सैव मुद्रा** स्यात्। यथा **सुरात्तसारे** देवै(वैः) गृहीततत्त्वे **अब्धौ** = समुद्रे **मर्यादाविपर्ययो** न स्यात्॥९४॥

[मूलम्] **यः प्रमाणीकृतः सद्भिः तस्यान्यत्किं विचार्यते।**
**अतुलेन तुलामेति काञ्चनेन सहोपलः॥९५॥**

[अव.] **यः प्रमा० सद्भिः** = विद्वद्भि[र्न]रैर्यः **प्रमाणीकृतः तस्य** त्वन्यत् **किं**

---

१ ब्रुड् सङ्घाते। हैमधातुपाठ-१३९।

**विचार्यते।** यथा **उपलः** = [दृ]षद् **अतुलेन** = बहुमूल्येन **काञ्चनेन** = सुवर्णेन सह **तुलाम्** = सदृशत्वम् **एति** = प्राप्नोति॥९५॥

[मूलम्] **तत्तल्लीलायितैर्बालैः शोभते श्रीमतां गृहम्।**
**क्रीडादुर्ललितैर्भाति कलभैर्व(र्वि)न्ध्यकाननम्॥९६॥**

[अव.] **तत्तल्लीला० श्रीमताम्** = लक्ष्मीवतां **गृहम्** = मन्दिरं **तत्तल्लीलायितैः** = तत्तल्लीलासंयुक्तै**र्बालैः शोभते**। यथा चम्पकाननं व(वि)न्ध्याचलवनं[1] **क्रीडादुर्ललितैः** = क्रीडादुश्चेष्टितैः **कलभैः** = लघुहस्तिभिः **शोभते**॥९६॥

[मूलम्] **मानमर्हति मत्तोऽपि येनायत्ता विभूतयः।**
**इभं भोजयते भूपश्चाटुकारपरः स्वयम्॥९७॥**

[अव.] **मानमर्ह० मत्तोऽपि** = मदोन्मत्तोऽपि **मानम् अर्हति** = योग्यो भवति। **येन** = पुंसा **विभूतय आयत्ताः** भवन्ति। यथा **भूतः(पः) स्वयं चाटुकारपरः** सन् **इभम्** = हस्तिनं भोजयते॥९७॥

[मूलम्] **समुन्नतैः सह स्पर्धा स्वाङ्गभङ्गाय केवलम्।**
**घनायासूयतेः पश्य हरेर्यत् पर्यवस्यति॥९८॥**

[अव.] **समुन्न० समुन्नतैः** = प्रौढैः **सह स्पर्धा केवलं स्वाङ्गभङ्गाय** स्यात् = स्वदेहभङ्गाय भवति। **पश्य** = विलोकय यथा **घनाय** = मेघाय **असूयतेः** = ईर्षां कुर्वतो **हरेः** = सिंहस्य **यत् पर्यवस्यति** = यद्विरूपं जायते॥९८॥

[मूलम्] **बलवानवजानाति दुर्विनीतं पृथग्जनम्।**
**भषन्तं भषणं पश्य करी किं कलहायते॥९९॥**

[अव.] **बलवा० बलवान्** = पुमान् **दुर्विनीतम्** = विनयरहितं **पृथग् जनम्** = नीचलोकम् **अवजानाति** = अवगणयति। **पश्य** = विलोकय **करी** = हस्ती **भषन्तं भषणम्** = श्वानं प्रति **किं कलहायन्ते(ते)** = किं कलहवदाचरति अपि तु नैव॥९९॥

---

१ विन्ध्याचलवनम् = चम्पकाननमिति भाव्यम्।

[मूलम्] **द्वेष्यते येन सर्वोऽपि कश्चित्तेनैव भूष्यते।**
**मदो निन्दास्पदं लोके हस्तिनः सुविभूषणम्॥१००॥**

[अव.] **द्वेष्यते० सर्वोऽपि** = लोको **येन** = वस्तुना **द्वेष्यते** = द्वेषं प्राप्नोति **कश्चित् तेनैव भूष्यते** = अलङ्क्रियते। यथा **मदो लोके निन्दास्पदम्** = निन्दास्थानं वर्तते **हस्तिनः** = गजस्य[1] [३ब] [**सुविभूषणम्**॥१००॥]

[मूलम्] **प्रख्यातवंशो यन्नाम्ना पुमान् शैषः क्वचिद्यतः।**
**द्रुमेष्वेकैव सा जम्बूर्जम्बुद्वीपो यदाख्यया॥१०१॥**[2]

[मूलम्] **किमौनि(न्न)त्यं किमौ[३ब]ज्व(ज्ज्व)ल्यं कुर्यान्निर्धनता यदि।**
**हित्वा हिमाद्रिं हेमाद्रिमाद्रियन्ते दिवौकसः॥१०२॥**

[अव.] {**ज्वल्यं कुर्यान्निर्धन**} **किमो०** पुरुषस्य **यदि निर्ध[न]ता** = दारिद्र्यम् तर्हि **ऊ(औ)न्नत्यम्** = उच्चत्वं किं तदा [औ]**ज्व(ज्ज्व)ल्यम्** = गौरत्वं **किं कुर्यात्**। दृष्टान्तमाह— **दिवौकसः** = देवा **हिमाद्रिम्** = हिमाचलं **हित्वा** = त्यक्त्वा **हेमाद्रिम्** = मेरुपर्वतम् **आद्रियन्ते** = आश्रियन्ते॥१०२॥

[मूलम्] **के{न}चित्(द्) भवत्य(न्त्य)कृत्येऽपि मित्राणां सहकारिणः।**
**सहाय(यः) किं न दाहाय दहनस्य समीरणः॥१०३॥**

[अव.] **केचि० मित्राणां केचित् पुरुष(षा) अकृतो(त्ये)ऽपि** सन्त उपकार(रं) विनापि **सहकारिणः सहाया भवन्ति**। **समीरणः** = वायुर्**दहनस्य** = वैश्वानरस्य **दाहाय** किं **सहाय(यः)** = साहाय्यकर्ता किं न भवति? अपि तु भवत्येव॥१०३॥

[मूलम्] **दत्ते धूर्तः सतृष्णानामनर्थेष्वर्थविभ्रमम्।**
**मरौ ग्रीष्म(ष्मः) तु(कु)रङ्गाणां पुष्णाति मृगतृष्णिका(काम्)॥१०४॥**

---

१ अत्र कश्चित्पाठो भ्रष्ट इति प्रतिभाति।

२ यन्नाम्ना शेषः प्रख्यातवंशो भवति स पुमान् क्वचिद्भवति। यतः द्रुमेषु सा जम्बूरेकैव यदाख्यया जम्बुद्वीपः प्रसिद्ध इत्यन्वयः॥१०१॥

[अव.] **दत्ते० धूर्तः सतृष्णानाम्** = लोभवताम् **अनर्थेषु** = निःसारेषु पदार्थेषु **अर्थविभ्रमम्** = अर्थशङ्कां दत्ते। दृष्टान्तमाह— **ग्रीष्मो मरौ कुरङ्गाणाम्** = हरिणानां **मृगतृलिका(कां) पुष्णाति**॥१०४॥

[मूलम्] **कस्यचिन्मृत्युसमये नितरां स्युर्महोदयाः।**
**विधास्यत(ध्यास्यतः) प्रदीपस्य पश्येत् वृद्धिमतीं शिखाम्॥१०५॥**

[अव.] **कस्य० कस्यचित्** = पुरुषस्य **मृत्युसमये नितराम्** अत्यर्थं **महोदयाः** = महान्त उदयाः **स्युः** दृष्टान्तो यथा **विध्यास्यतः प्रदीपस्य वृद्धिमतीं शिखां पश्य** = विलोकय॥१०५॥

[मूलम्] **उपकारोऽपि निर्न्ना(र्ना)म नाश्यते कृतनासि(शि)भिः।**
**पयोदानां पयोवृष्टेः ब्रूहि किं कुरुते मरुः॥१०६॥**

[अव.] **कृतनाशिभिः** = कृतघ्नैः **उपकारोऽपि निर्नाम** यथा भवति तथा **नाश्यते** हे वत्स! **ब्रूहि मरुः** = मरुस्थली **पयोदानाम्** = मेघानां **पयोवृष्टेः किं कुरुते**॥१०६॥

[मूलम्] **सुखाय मञ्जुलच्छायः प्रभुः प्रागेव किं धनैः।**
**वटो हन्ति श्रमं सद्यः पान्थानां पथि किं फलैः॥१०७॥**

[अव.] **सुखा० प्रभुर्मञ्जुलच्छायः** = प्रशस्यशोभः सन् प्रागेव प्रथम**[मेव सुखा]य** भवति। विधाने दृष्टान्तं दर्शयति— **वटः पन्थिं(थि) पथा(पान्था)नां सद्यः** = तत्कालं **श्रमं हन्ति, फलैः किम्?** किं वि[शिष्टो] वटः **मञ्जुलच्छायः**॥१०७॥

[मूलम्] **क्षुद्राणामद्भुता लक्ष्मीर्मृत्योर्लक्ष्मेति निश्चयः।**
**पिपीलिकानामुत्थानं पक्षयोः क्षयहेतवे॥१०८॥**

[अव.] **क्षुद्रा० क्षुद्राणाम्** = दुर्जनानाम् **अद्भुता लक्ष्मीर्मृत्योः** = मरणस्य **लक्ष्म** = लक्षणं भवति **इति निश्चय** एव **पिपीलिकाणा(ना)म्** = कीटिकानां **पक्षयोरुत्थानं क्षयहेतवे** = मरणाय भवति किं [विशिष्टानां] **क्षुद्राणाम्** = ह्रस्वानां लघूनाम्॥(१०८)॥

[मूलम्] **तृणाय मन्यते लोकैश्चिरादल्पफल(लः) प्रभुः।**
**फलन् वर्षशतो(ता)त्तालस्तृणराजस्तदुच्यते॥१०९॥**

[अव.] **तृण० लोकैश्चिरात्** = चिरकालेनापि **अल्पफलप्रभु**स्तृ[णाय मन्य]ते। दृष्टान्तमाह— **तालः वर्षश[तात्] फलन्** सन् **तस्मात्** = कार[णात्] **तृणराज उच्यते**॥१०९॥

[मूलम्] **तन्मिथ्या यन्मिथो वैरमेकद्रव्याभिलाषिणः(णाम्)।**
**रसना दशनैः सार्धं सदा संयुज्य कल्पते॥११०॥**

[अव.] **तन्मि[थ्या] यद्०** = यस्मादे**कद्रव्याभि[लाषि]णां** पुरुषाणां **मिथौ(थो) वै[रम्]** = --त **तन्मिथै(थ्यै)**व दृष्टान्तमाह— **रसना दशनैः सार्धं सदा संयुज्य** = संयोगं प्राप्य वर्तते तिष्ट(ष्ठ)ति॥११०॥

[मूलम्] **जनस्य यावती सम्पद्विपत्तिरपि तावती।**
**दृष्टान्तः स्पष्ट एवात्र रजनीजीवितेश्वरः॥१११॥**

[अव.] **जनस्य० जनस्य** = लोकस्य **यावती सम्पद्** = लक्ष्मीर्भवति **तावती विपत्तिरपि** = विनाशं(शः) स्यात्। अत्र एतदर्थे **रजनीजीवितेश्वरः** = चन्द्र(न्द्रः) **स्पष्टम्(ष्ट) एव** = प्रकट एव दृष्टान्तः १(?) यतश्चन्द्रस्य यावती वृद्धिस्तावानेव क्षयो भवति॥१११॥

[मूलम्] **स्वस्था[स्]तेजस्विनः प्रायस्तिरस्कारेऽपि दुःसहाः।**
**रविपादाहतो हन्त ज्वलति ज्वलनोपलः॥११२॥**

[अव.] **स्वस्था० प्रायः** = बाहुल्येन **तेजस्विनस्तिरस्कारे** सति **दुस्सहा** भवन्ति **किं [विशिष्टाः] तेजस्विनः स्वस्थाः** = स्वस्थाने स्थिताः। दृष्टान्तमाह— **ज्वलनोपलः** = सूर्यकान्तो{रे} **रविपादाहतो हन्त** इति खेदे ज्वलति अत्र पाड(द)शब्दो व्यङ्ग्यम्॥११२॥

[मूलम्] **दोषवान् स्तूयते यस्तु दा(दा)नशक्तिर्गरीयसी।**
**गजानां गण्यते केन तादृक्(ग्) जिह्वाविपर्ययः॥११३॥**

[अव.] **दोषवान् श्रू(स्तू)यते यत्त(स्तु) दानशक्तिर्ग० यद्दोषवानपि श्रू(स्तू)यते** तद्गि(द्ग)**रीयसी दानशक्ति**र्ज्ञेया दृष्टान्तः तादृ[४अ]क्(ग्) **जिह्वाविपर्ययः**

= अभावः **गजानां केन गण्यते?** अपि तु न गण्यते। यतस्तेषां गजेन्द्राणां **दानशक्तिः** = मदजलः(लम्)॥११३॥

[मूलम्] **शुद्धानामुदये शुद्धा वर्धन्ते जातु नेतरे।**
**शुद्धौ दिनानि चीयन्ते क्षीयन्ते क्षणदा पुनः॥११४॥**

[अव.] **शुद्धानाम्० शुद्धानाम्** = निर्मलानां पुरुषाणा**मुदये शुद्धा वर्धते(न्ते)**। **जातु** = कदाचित् **इतरे** अशुद्धा **न वर्धन्ते**। दृष्टान्तमाह— **शुचौ** = अषाढमासे **दिनानि चीयन्ते** = वर्धन्ते। पुनः **क्षणदा** = रात्रयः **क्षीयन्ते** = क्षयं प्राप्नुवन्ति अत्र शुचिशब्दस्य छलना॥११४॥

[मूलम्] **हेयोपादेयवैदुष्यं विमलस्ये(स्यै)व दृश्यते।**
**ह(हं)सादन्यत्र यो(नो) दृष्टं क्षीरनीरविवेचनः(नम्)॥११५॥**

[अव.] **हेयोपा० हेयोपादेयवैदुष्यम्** = ग्राह्याग्राह्यपदार्थनिपुणत्वं **विमि(म)-लस्यैव** = पुरुषस्य भवति। दृष्टान्तो यथा **क्षीरनीरविवेचनम्** = दुग्धजलयोः पृथक्करणं **हंसादन्यत्र नो** दृष्टान्त(ष्टम्)॥११५॥

[मूलम्] **शक्त्या युक्त्या च संरोद्धुं शक्या नाकस्मिकी विपत्।**
**कुतोऽप्यागत्य वात्याभिर्दीपो विध्याप्यते क्षणात्॥११६॥**

[अव.] **शक्त्या० आकस्मिकी विव(प)त् शक्त्या** चात्यद्(**च युक्त्या**) = बुद्ध्या **संरोदु(द्धुम्)** = बा(वा)रयितुं **न शक्या**। दृष्टान्तोऽत्र **दीपो वात्याभिः कुतोऽप्यागत्य क्षणाद(द्) विध्याप्यते** = विनाश्यते॥११६॥

[मूलम्] **भद्रमाशास्महे तस्मै यः स्यान्मौनी गुणा[४अ]धिकः।**
**कः किल स्तौति काकोलं दा(वा)चालं सति कोकिले॥११७॥**

[अव.] **भद्रम्० यः** = पुमान् **गुणाधिको मौनी स्यात्, तस्मै** = पुरुषाय वयं **भद्रम्** = कल्याण**माशास्महे** = प्रशंसां कुर्महे एतावता चिरञ्जीवतु। दृष्टान्तः **कोकिले** सति **वाचालं काकोलम्** = काकसमूहं किल इति सत्ये **क(कः) स्तौति**॥११७॥

[मूलम्] **त्वमात्मान(नु)प्रविष्टेभ्यः सद्या(द्यो) दद्यात्(द्याः) समुन्नतिम्।**
**दुनोत्यस्मान् लघून् कुर्वन् दर्पणोऽप्यर्पितात्मनः॥११८॥**

[अव.] **त्वमा०** हे मित्र! **त्वम् आत्मानुपृ(प्र)विष्टेभ्यः** = आत्माश्रितेभ्यः। **सत्यसू(द्यः** = त)त्कालं **समुन्न[तिं द]द्याः।** व्यतिरेकदृष्टान्त[माह]— **दर्पणेऽप्यर्पितात्मनः [अ]स्मान् लघून् कुर्वन् दर्प[णो] दुनोति** = पीनान् करोति। अनो(तो) दर्पणवन्न विधेयम्॥११८॥

[मूलम्] **किमप्यसाध्यं महतां सिद्धिमेति लघीयश:(सः)।**
**प्रदीपो हेम(भूमि)गेहान्तध्वान्तं हन्ति न भानुमान्॥११९॥**

[अव.] **किम्० महतां किं**वि(किञ्चि)द्वस्तु **आ(अ)साध्यमपि** तद्वस्तु **लघीयसः** = पुरुषस्य **सिद्धिमेति** = साध्यं भवतीत्यर्थः। दृष्टान्तमाह— **प्रदीपः भूमिगेहान्त(न्ते)** = भूमिगृहमध्ये **ध्वान्तं हन्ति** परं **भानुमान्** = सूर्यो **न हन्ति**॥११९॥

[मूलम्] **विस्तीर्णे(र्णै)रूर्णनाभस्य सर्वदिक्(ग्)व्यापिभिर्गुणैः।**
**अन्तं जन्तुगुणो नीतः कियत् क्षुद्रस्य सुद(न्द)रम्॥१२०॥**

[अव.] [**विस्तीर्णै०**] **ऊर्णनाभस्य** = कौलिकस्य **गुणैः जन्तुगणः** = जीवसमूहः अन्तं [नी]तः = मरणं प्रापितः कथम्भूतैः **गुणैः विस्तीर्णे:(र्णैः)** पुनः किं०[विशिष्टैः] गुणैः **सर्वदिग्व्यापिभिः।** {यत्कोद्वस्तु भोग्याद्विशिष्य(?) [विशि]ष्टतरं भवति।} [अ]यमर्थ(र्थः) **क्षुद्रस्य** = लघोः **सुन्दरं कियत्**॥१२०॥

[मूलम्] **भोग्याद् विशिष्यते वस्तु यत् प्राप्ते(पात्रे) न्यस्तमात्मना।**
**पयः प्री(पी)यूषमब्देतु(षु) वारिधेर्विषमात्मनि॥१२१॥**

॥इति श्रीमलधारश्रीनरेन्द्रप्रभविरचितं दृष्टान्तशतं समाप्तम्॥छ॥छ॥

[अव.] **भोग्या०** स्वभागयोग्यान् **आत्मना यद्वस्तु पात्रे न्यस्तम्** = दत्तम्। तद्वस्तु **भोग्याद्विशिष्यते** = विशिष्टतरं भवति। दृष्टान्तमाह— **वारिधेः** = समुद्रस्य **पयः** = पानीय**मात्मनि विषं** तदेव जलं पात्ररूपे**ऽब्देषु** = मेघेषु न्यस्तं **पीयूषम्** = अमृतं भवति॥१२१॥

॥इति दृष्टान्तशतावचूरिः॥छ॥

## आचार्यश्रीनरेन्द्रप्रभसूरिकृतम्

# ॥दृष्टान्तशतम्॥

## राष्ट्रभाषासारानुवादः

---

श्रेष्ठ ज्योति को प्रणाम करके अनेक प्रकार के दृष्टान्तों के द्वारा शक्ति के अनुसार सुभाषितों की माला बना रहे हैं॥१॥

बुद्धिमान पुरुष समय आने पर ही बोलते हैं बिना समय के नहीं बोलते। मोर बादलों के आने पर ही आवाज करता है नहीं तो शांत रहता है॥२॥

कोई व्यक्ति स्वभाव से उपकार करता है तो कोई व्यक्ति स्वभाव से विश्वास का भंग करता है। चैत्रमास स्वभाव से ही वृक्षों में पर्ण को उत्पन्न करता है तो फाल्गुनमास स्वभाव से ही वृक्षों से पर्णों का नाश करता है। उपकार करना या अपकार करना यह व्यक्ति के स्वभाव पर निर्भर है। चैत्रमास का यह स्वभाव है कि वह वृक्ष पर पर्णों को उत्पन्न करता है तो फाल्गुनमास स्वभाव से वृक्षों से पर्णों का नाश करता है॥३॥

विपरीत परिस्थिति में भी धीर पुरुष का तेज कम नहीं होता बल्कि बढता ही है। सोने को अग्नि में डालने पर उसका तेज बढता है॥४॥

अच्छे लोग स्वयं दुःख सहन करके दुसरों के दुःख दूर करते हैं। वृक्ष स्वयं ताप सहन करके सभी को छाया देते हैं॥५॥

व्यक्ति की परीक्षा लक्ष्मी से नहीं होती उसके गुणों से होती है। चंदन के वृक्ष को फल नहीं होते फिर भी वह अपनी सुगंध की वजह से उपादेय होता है॥६॥

सज्जन लोग संकट में भी अपना स्वभाव नहीं छोडते। कर्पूर जलने पर भी अपने सुगंध को नहीं छोडता॥७॥

समय से पहले किया हुआ उपकार नुकसान करता है। काल से पहले हुई वृष्टि खेती को नुकसान करती है॥८॥

दुष्ट व्यक्ति अपने ही स्वजनों को तकलीफ देता है। जैसे राहु चंद्र को तकलीफ देता है॥९॥

सर्प भी अपना कार्य पूर्ण होने पर निश्चिंत होकर सो जाते हैं लेकिन दुर्जन अपना कार्य पूर्ण होने पर भी दुसरों को परेशान करता है॥१०॥

दुर्जन और विष दोनों भाई जैसे है। कौन ज्यादा जहरीला है यह हम नहीं जान सकते॥११॥

सर्प को कान नहीं होते है फिर भी वह डसता है। दुर्जन व्यक्ति कान होने पर भी दुसरों के मर्म पर सर्प की तरह आघात करता है॥१२॥

गर्व करनेवाला गलत आदमी सच्चे और नम्र आदमी को हरा देता है। यह दिखाता है कि गर्व सभी का नाश करता है यह बात सही नहीं है। ॥१३॥

समर्थ लोगों की शक्ति दुश्मनों का नाश करती है। सूर्य की प्रभा अंधकार का नाश करती है॥१४॥

मालिक के चले जाने पर उसका परिवार दुःखी होता है। सूर्य के अस्त होने पर कमल मुर्झा जाते हैं॥१५॥

जिसका परिवार अच्छा होता है लोग उसकी पूजा करते हैं। अशोक के वृक्ष के पर्ण पवित्र होते हैं इसी कारण लोग अशोक वृक्ष की पूजा करते हैं॥१६॥

अच्छे पुरुषों की संगति से सामान्य पुरुष की महिमा बढती है। जैसे गंगा की संगति से उसकी किनारे की रेत भी ब्राह्मण लोग मस्तक पर लगाते हैं॥१७॥

वही संपत्ति प्रशंसा के पात्र है जो सब के काम आती है। कुएं से सरोवर अच्छा है क्योंकि सरोवर का जल सभी आसानी से पी सकते हैं॥१८॥

छोटा सा भी दोष बहुत सारे गुणों को दूषित करता है। जहर का एक बूंद अमृत से भरे हुए कुंभ को दूषित कर देता है॥१९॥

कार्य इस तरह करना चाहिए जिससे उपकार करनेवाले को खुशी मिले, दुःख ना हो। भ्रमर पुष्पों का रस पीता है किंतु रस देनेवाले पुष्प को पीडा नहीं देता॥२०॥

स्वामी क्रूर हो तो सेवक अपनी क्षमता के अनुसार कार्य नहीं कर सकते। वे जीते जी मरे जैसे हो जाते है। अंधेरे में कोई भी चीज होते हुए भी नहीं के समान होती है॥२१॥

जब तक भाग्य है तब तक प्रभाव है। दीपक में जब तक तैल है तब तक प्रकाश है॥२२॥

दुष्ट पुत्र अपने परिवार का नाश करता है जैसे अग्नि जहाँ उत्पन्न होती है उसी को जला देती है॥२३॥

अपनों का स्नेह अलग ही होता है अपने आपत्ति या संपत्ति में अपने ही रहते हैं पराए नहीं हो जाते। समुद्र चंद्रमा का खुद का पुत्र है इसी कारण चंद्र के बढने पर समुद्र में बाढ आती है और घटने पर भाटा आती है॥२४॥

आम का फल मधुर होता है, पुष्प मधुर नहीं होता इसी तरह पूर्वजों के पास जो नहीं होता वह वंशज के पास होता है॥२५॥

बपैया(चातक) नामक पक्षी केवल बारीश का जल पीता है उसी तरह स्वमानी पुरुष केवल अपने स्वामी का दिया हुआ ही— भले वह कम क्यों ना हो— ग्रहण करते हैं॥२६॥

वृक्ष से गिरता हुआ कपोत उस शाखा को भी गिरा देता है जिसके ऊपर वह बैठा था। उसी तरह नीच पुरुष अपने स्वामी की लक्ष्मी का भी नाश करता है॥२७॥

लंबे काल के बाद फल देनेवाले स्वामी से लोक उद्विग्न हो जाते हैं। ताड का वृक्ष बहुत ऊंचा होता है अतः उसके फल की इच्छा निराशा ही देती है आज भी कवि लोग ताड वृक्ष की निंदा करते हैं॥२८,२९॥

जो समर्थ होते हुए भी अल्प ही फल देता है वह वटवृक्ष की तरह अपनी कीर्ति गवां देता है॥३०॥

अपने घर का दीप जलाकर दीवाली मनाई जाती है, दुसरों के घर से लाख दीपक लाकर दीवाली मनाई नहीं जाती। निजी संपत्ति प्रदान करके दुसरों को आनंद दिया जा सकता है॥३१॥

अपने आप परिपक्व हुआ पुण्य ही सार्थक होता है। स्वयं पके हुए आम का

स्वाद कोई ओर ही होता है॥३२॥

व्यक्ति अपने संगति से प्रसिद्धी को प्राप्त होता है। जैसे चंद्रमा के योग से रात्रि उजाला देनेवाली होती है और अंधेरे के कारण अंधेरा देनेवाली होती है॥३३॥

मूर्ख मनुष्य केवल मेहनत करता है उसका फल बुद्धिमान को मिलता है। मेरु ने समुद्र का मंथन किया उसका फल देवों को मिला॥३४॥

व्यक्ति अपने चरित्र से महत्ता प्राप्त करता है, कुल के कारण नहीं। जैसे समुद्र से चंद्र उत्पन्न हुआ और जहर भी उत्पन्न हुआ है॥३५॥

सूक्ष्म बुद्धिवाला व्यक्ति क्षण में ही वस्तु सार है या असार यह पहचान जाता है। वायु एक ही क्षण में घास और शिला का अंतर पहचान जाता है॥३६॥

संकट में भी अपने समय को नहीं छोडना चाहिए। चंद्र कला की हानि होने पर भी अपना आकाशस्थित स्थान नहीं छोडता है॥३७॥

इस जगत् में प्रसिद्धि ही बलवान होती है। वस्तु कैसी भी हो उससे कोई अंतर नहीं होता। दुध पवित्र है फिर भी दही ही मंगल में श्रेष्ठ माना जाता है॥३८॥

सेवकों का उत्कर्ष और अपकर्ष स्वामी के अधीन होता है। सूर्य ही दिन को बढाता है या कम करता है॥३९॥

जो महात्माओं का द्रोह करते हैं वे खुद का भी द्रोह करते हैं। उल्लू सूर्य की ईर्ष्या करता है इसलिए उसको दिन में दिखाई नहीं देता॥४०॥

पिता के अच्छे चारित्र से पुत्र को महान पुरुषों की पंक्ति में स्थान मिलता है। जैसे गोल होने के कारण पीपल के पत्र को आम के पत्र के समान मंगल गिना जाता है॥४१॥

शुरु में अच्छे लगनेवाले आदमी बाद में निष्फल दिखते हैं। गन्ना नीचे से मधुर होता है लेकिन ऊपर का घास खाने योग्य नहीं होता॥४२॥

जिस व्यक्ति का संबंध श्रेष्ठ होता है उसके लिए आपत्ति भी संपत्ति हो जाती है। जिसका संबंध मजबूत नहीं होता वह आपत्ति से बाहर नहीं निकलता। वह अग्नि में डाले हुए वस्त्र की तरह अपना अस्तित्व खो देता है॥४३॥

पुण्य समाप्त होने पर लक्ष्मी का नाश होता है। जल सूख जाने पर कमल भी

मुर्झा जाता है॥४४॥

वृक्ष का विस्तार मूल की दृढता पर आधारित है। वैभव का विस्तार पूर्व के पुण्य पर आधारित है॥४५॥

शत्रु के उत्पन्न होने पर जिसकी पहचान मजबूत है ऐसे व्यक्ति का भी तेजोवध हो जाता है। जैसे फाल्गुन मास में जिसका मूल मजबूत है ऐसे छायावृक्ष की छाया भी नष्ट होती है॥४६॥

महान् व्यक्ति का माहात्म्य स्थान के कारण ही होता है। माला भगवान के मस्तक पर चढी हो तब तक पूज्य गिनी जाती है जैसे ही मस्तक से उतरती है निर्माल्य कही जाती है॥४७॥

गलत जगह पर किया गया प्रयास विनाश का कारण होता है। बंजर जमीन पर की गयी खेती बीज का भी नाश कर देती है॥४८॥

तेजस्वी स्वामी का सेवक परिवार शत्रु का उच्छेद करता है। सूर्य के किरण अंधकार का उच्छेद करते हैं॥४९॥

सत्ता का तेज लक्ष्मी के तेज से बढकर होता है। जूडे में स्थित पुष्प से शिखा के पुष्प का प्रभाव अधिक होता है॥५०॥

पुत्र विनयी हो तो पिता की शिक्षा साक्षी मात्र होती है। स्वयं तेजस्वी रत्न को बाह्य उत्तेजक तेज की जरुरत नहीं होती॥५१॥

प्रिय का संग कठिनतम पदार्थ को भी भेदता है। चंद्र के स्पर्श से चंद्रकांतमणि जलबिंदू को उत्पन्न करती है॥५२॥

कोई व्यक्ति गुग्गल की तरह दुसरों के दुःख दूर करने के लिए स्वयं अग्नि में कूदकर अपना बलिदान देते हैं॥५३॥

पद की प्राप्ति पहचान से नहीं लेकिन गुणों से होती है। प्रदीप सूर्य की तरह प्रकाश देता है लेकिन शनि सूर्य का पुत्र होने पर भी प्रकाश नहीं देता है॥५४॥

कोई व्यक्ति सभी के लिए त्याज्य होता है वह किसी के लिए उपास्य भी बन सकता है। जैसे काजल दूसरी जगह से निकाला जाता है परंतु आखों में लगाया जाता है॥५५॥

स्त्री दोहद के अनुसार संतान को जन्म देती है यह बात सही नहीं है। केतकी स्वयं दोहद के अनुसार जन्म लेती है॥५६॥

चाहे कितने भी पैसेवाला हो लेकिन वह स्वार्थी हो तो उसके पास कोई नहीं जाता। जैसे समुद्र रत्नों की खान है फिर भी वडवानल के कारण कोई उसके पास नहीं जाता॥५७॥

अधमपुरुष स्वभाव से ही गलत मार्ग से जाते हैं। जैसे छोटी मछली जलप्रवाह के विरुद्ध मार्ग से जाती है॥५८॥

कभी कभी अलौकिक गुण भी दोष का कारण बन जाता है। बहुत बडा होने के कारण आकाश को शून्य कहा जाता है।॥५९॥

चंचल वृत्तिवाला व्यक्ति स्थिर सफलता प्राप्त नहीं कर सकता। स्थिर वृत्तिवाला व्यक्ति ही स्थायिक सफलता को प्राप्त करता है। जैसे स्थिर गतिवाला होने से सूर्य ग्रहों के साम्राज्य का वहन करता है चंद्र की गति चंचल होती है इसलिए वह ग्रहों के साम्राज्य का वहन नहीं करता है ॥६०॥

विचक्षण पुरुष सभा के अनुसार स्वयं की पहचान बनाते हैं। जैसे कुंडली में बुधग्रह अन्य क्रूरग्रहों के साथ हो तो क्रूर कहलाता है और सौम्यग्रहों के साथ हो तो सौम्य कहलाता है॥६१॥

नीच पुरुष की संपत्ति नीच स्थान पर रहकर सड जाती है। अंधे कूप का अगाध जल को शैवाल लग जाता है॥६२॥

कोई व्यक्ति प्रयास करने से कंजूष के पास से भी व्यय करवाता है। जैसे अरघट्ट के घुमाने से कूप से जल बाहर निकाला जाता है॥६३॥

संकुचित वृत्तिवाला पुरुष सदा मांगता रहता है और उदार मनवाला पुरुष हमेशा देता रहता है। जैसे खाली बादल सागर से पानी पीता है और भरा हुआ बादल पानी बरसाता है॥६४॥

बुद्धिमान व्यक्ति ही अन्य व्यक्ति के गुणों को जान सकता है। साधारण व्यक्ति को गुणों की पहचान नहीं होती। ग्वाला कभी रत्नों का मूल्य नहीं कर सकता॥६५॥

लोग उसी धनवान पुरुष की प्रशंसा करते हैं जो दाता है। सुंदर युवति दुर्भगा

होती है तो उसको कोई नहीं चाहता॥६६॥

गुण या अलंकार तभी शोभा देते हैं जब उसको उसके स्थान पर रखा गया हो। माला गले में शोभा देती है पैरों में नहीं॥६७॥

अर्थी लोग उदार स्वामी की ही सेवा करते हैं। नदी का जल आसानी से मिलता है इसलिए पथिक लोग उसका आश्रय लेते हैं॥६८॥

चंदन के वृक्ष की तरह यश से सुगंधित धन धन्य व्यक्ति को ही प्राप्त होता है॥६९॥

किसी भी रूप में संपत्ति का स्रोत अखंड है तो सभी पदार्थ कार्य करते हैं। सोने का कुंभ टूट जाने पर भी मूल्यवान होने की वजह से अनेक कार्य करता है॥७०॥

जिस काल में अच्छे आदमी को भी संताप होता है वह काल दूषित माना जाता है। सूर्य के अस्त होने का समय प्रदोष कहा जाता है॥७१॥

दुसरों के आधार पर प्राप्त की गई उन्नति या सफलता ज्यादा देर नहीं रहती। वायु से आकाश में ऊपर उठी धूल थोडी ही देर में नीचे गिर जाती है॥७२॥

प्रभुता (बडा नाम) पुण्य से प्राप्त होती है सुवर्ण से नहीं। हिमाचल को पर्वत का राजा कहते हैं सुवर्ण का होने पर भी मेरु पर्वत को राजा नहीं कहते॥७३॥

बिना सोचे किया हुआ जरुरत से ज्यादा त्याग स्थान की हानि कर देता है। जैसे खाली बादल को वायु दुसरी जगह पर ले जाता है॥७४॥

याचक श्रीमंत का ही आश्रय करते हैं निर्धन का नहीं। लोग फलवाले वृक्ष के ही पास जाते हैं फलरहित वृक्ष के पास नहीं॥७५॥

केले के वृक्ष को फल लगता है तब वह रोता है इसलिए घर के पास केले के वृक्ष को लगाना अशुभ माना गया है। उसी तरह जो पुत्र माँ को दुःख देता है उसका जन्म न देना ही बेहतर है॥७६॥

लाखों पुत्र होने पर भी ख्याति किसी एक पुत्र की ही होती है। समुद्र में लाखों जलचर उत्पन्न होते हैं लेकिन आवाज केवल शंख से ही निकलता है॥७७॥

पराया व्यक्ति कार्यक्षम हो तो प्रिय हो जाता है। अपना पुत्र भी कार्यक्षम न हो तो प्रिय नहीं होता। शनि सूर्य का पुत्र है फिर भी सूर्य ने अपना तेज पराया अग्नि को

ही दिया है॥७८॥

बहुत ही बडे व्यक्ति का घनिष्ठ संबंध आपत्ति को उत्पन्न कर देता है। ज्योतिषशास्त्र में सूर्य के नजदिक जानेवाला ग्रह अस्तंगत कहलाता है॥७९॥

कुलीन स्त्री अपना सर्वस्व पति को समर्पित करती है। जैसे नदी अपना सर्वस्व समुद्र को समर्पित करती है॥८०॥

महान पुरुष अपने दुष्ट पुत्र का भी पालन करते हैं। जैसे बादल बिजली का वहन करता है॥८१॥

सज्जन पुरुष समय आने पर याचक को कृतार्थ करने का प्रयास करते हैं। जैसे वर्षा ऋतु में बादल बरसते हैं और धरती को कृतार्थ करते हैं॥८२॥

जैसे पैर के प्रहार से कुसुंभ का वर्ण बढता है वैसे ही रागी पुरुष का राग तिरस्कार करने पर भी बढता है॥८३॥

जैसे धरती अग्नि लगानेवाले को भी अनंत फल देती है। उसी तरह सहनशील पुरुष अपकारि व्यक्ति पर भी उपकार करते हैं॥८४॥

सच्चे पुरुष का एक शब्द कपटी पुरुष के लिए भयानक होता है। जैसे मयूर के शब्द से सर्प भाग जाता है॥८५॥

सज्जन व्यक्ति अपना गुण दुष्टों के साथ रहकर भी नहीं बदलता। जैसे जहरीले सांप के मस्तक पर रहनेवाला मणि अपना जीवन देने का गुण नहीं छोडता॥८६॥

गुणसंपन्न पुत्र अपने पिता के कलंक को निर्मूल नहीं कर सकता। जैसे कमल अपने जन्मदाता कीचड की कालिमा को नहीं बदलता॥८७॥

जिसको स्वामी घर से निकाल देता है उसको कोई बुलाता नहीं है। जैसे सूर्य और चंद्रमा राहु को अपना स्थान नहीं दिया इसलिए उसको कोई बुलाता नहीं है॥८८॥

नीच पुरुष का मन पाप में जल्द ही एकाग्र हो जाता है। जैसे बगला मछली को पकडने के लिए एकाग्र हो जाता है॥८९॥

कोई स्वामी स्वयं मूर्ख होते हुए भी अपने सेवक को सुकुलीन बना देता है।

जैसे लोहचुंबक लोहे को अपने जैसा बना देता है॥९०॥

विचक्षण पुरुष कभी कभी मूर्ख का भी कार्यविशेष के लिए मुख देखता है। कसोटी का पत्थर काला है फिर भी स्वर्ण की परीक्षा में उपयोगी होता है॥९१॥

कष्ट के समय में दृढ व्यक्ति का मनोबल पिघल जाता है। प्रचंड अग्नि में लोहा भी पिघल जाता है॥९२॥

साधारण पुरुष तपरूपी तीर्थ में स्नान करके भी क्रोधरूपी कीचड में गिर जाता है। जैसे हाथी पानी में स्नान करके भी मिट्टी से अपना शरीर खराब कर देता है॥९३॥

वैभव रहे या चला जाए महान आत्माओं के स्वभाव में अंतर नहीं आता। देवों ने समुद्र का वैभव ले लिया फिर भी वह अपने मर्यादा का उल्लंघन नहीं करता॥९४॥

सज्जनों ने जिसको सम्मति दी है उसके बारे में ज्यादा विचारणीय नहीं होता। तुला में बहुमूल्य सुवर्ण के साथ पत्थर समान होता है॥९५॥

धनवान पुरुषों का घर बालकों की क्रीडा से हराभरा रहता है। जैसे विन्ध्याचल पर्वत का वन हाथी के बच्चों से हराभरा रहता है॥९६॥

जिसके पास सामर्थ्य होता है वह अभिमानी होते हुए भी मान प्राप्त करता है। राजा अपने हाथी को अपने हाथों से भोजन कराता है॥९७॥

उँचे स्थान पर बैठे हुए व्यक्ति के साथ स्पर्धा करने से खुद का ही नाश होता है। जैसे बादल के साथ स्पर्धा करनेवाला सिंह स्वयं को नष्ट करता है॥९८॥

बलवान पुरुष अपने से नीच व्यक्तिओं ने किये हुए अपमानों की अवगणना करता है। हाथी भौंकते हुए कुत्ते के साथ झगडा नहीं करता॥९९॥

कभी कभी जो अवगुण दुसरों के लिए द्वेष का कारण होता है वही अवगुण अन्य के लिए शोभा का कारण बन जाता है। मद ओरों के लिए अवगुण है लेकिन हाथी के लिए शोभा है॥१००॥

जिसके नाम से वंश प्रसिद्ध हो ऐसा पुरुष कोई एक ही होता है। वृक्षों में जंबू ही एक ऐसा वृक्ष है जिसके नाम से जंबूद्वीप प्रख्यात हुआ है॥१०१॥

निर्धन पुरुष के उच्च कुल, पदवी या गौरवर्ण की कोई किमत नहीं होती। देव हिमाचल को छोडकर मेरु का आश्रय लेते हैं॥१०२॥

कुछ लोग ऐसे होते हैं जो अकृत्य करनेवाले मित्र को भी सहाय करते हैं। वायु सभी को दहन करनेवाले अग्नि की मदद करता है॥१०३॥

धूर्त व्यक्ति असार पदार्थ में भी सार दिखाता है। मरुभूमि में ग्रीष्म ऋतु हिरन को मृगजल दिखाती है॥१०४॥

किसी व्यक्ति की उन्नति मृत्यु के समय होती है। बुझते हुए दीपक की शिखा बढ जाती है॥१०५॥

कृतघ्न पुरुष उपकारों का समूल नाश कर देते हैं। मरुभूमि में बादलों की वृष्टि व्यर्थ ही होती है॥१०६॥

सभी को आश्वासन देनेवाला स्वामी शुरु से ही सुख देता है, धन तो बाद की बात है। वटवृक्ष फल नहीं देता लेकिन छाया तो देता है॥१०७॥

दुर्जनों को मिली हुई संपत्ति उसके नाश का लक्षण है। चींटी को पंख आते है वह उसके विनाश का लक्षण है॥१०८॥

चिर काल में बहुत कम फल देनेवाले स्वामी की किमत नहीं रहती। तालवृक्ष सौ साल के बाद फल देता है उसको तृणराज कहा जाता है॥१०९॥

एक वस्तु की अभिलाषा रखनेवाले दो व्यक्ति के बीच में वैर होता है यह बात सही नहीं है। दात और जीभ एक ही द्रव्य की अभिलाषा करते हैं फिर भी उनमें सामंजस्य होता है॥११०॥

व्यक्ति की उन्नति जितनी होती है उतनी अवनति भी होती है। जैसे चंद्र जितना बढता है उतना ही कम होता है॥१११॥

तेजस्वी व्यक्ति तिरस्कार प्राप्त होने पर अपने स्थान पर ही रौद्ररूप धारण करते हैं। सूर्य के किरणों से आहत सूर्यकांतमणि अपनी जगह पर ज्वलित होता है॥११२॥

